नं: ६४-घ

सिद्धान्तकौमुदी व्याख्या

लघुशब्देन्दुशेखरः

पत्राणि १५६
३१२

ल॰श॰शे॰ ॥श्रीमहागणपतये नमः॥ ॥पातंजले महाभाष्ये कृतभूरिपरिश्रमः॥शिवभट्टसुतो धीमान्स
१ तीदेव्यास्तु गर्भजः॥१॥याचकानां कल्पतरोररिकक्षहुताशनात्॥शृंगवेरपुराधीशाद्रामतो ल
ब्धजीविकः॥२॥नत्वा फणीशं नागेशस्तनुतेर्थप्रकाशकम्॥मनोरमोमार्द्धदेहं लघुशब्देंदुशे
खरं॥३॥ग्रंथसमाप्तिप्रत्यूहप्रचारादिप्रतिबंधकदुरितप्रशमाय समुचितकृषित्रयनमस्का
ररूपं मंगलमाचरन् शिष्यशिक्षायै व्याख्यातृश्रोतॄणामनुषंगतो मंगलाय च निबध्नाति॥
मुनित्रयमिति।कारकविभक्तेर्बलवत्त्वाद्द्वितीया॥परिभाव्येति॥तच्छब्दस्य बुद्धिस्थपराम
र्शकत्वात्स्वाचार्यस्तुतीस्तिरस्कृतेस्सर्वेः।मुनित्रयोक्तीर्विचार्येत्यर्थो वा।परिभावस्तिरस्क्रियेति
कोशात्तिरस्कारार्थस्य धातोर्विचारार्थत्वेपि न बाधकम्।धातूनामनेकार्थकत्वात्।अत एव च
परौ भुवोऽवज्ञान इति संगच्छते॥तेन स्वग्रंथस्य प्राचीनग्रंथैरगतार्थत्वासमूलत्वं च ध्वनि
तम्॥भाविनोपि बुध्या विषयीकरणाद्द्वियमिति निर्देशः।सिद्धांतप्रकाशकत्वेनातिदुरूहग्रं
थांतरेभ्यः सिद्धांतज्ञाने जायमानस्य क्लेशरूपस्य संतापस्य शामकत्वेन च कौमुदीसादृश्यं।अने
एउ

=अत्रमूलेचासिद्धांतसाद[illegible]नप्रक्रियासिद्धांतानि[illegible]लित:तेन[illegible]
[illegible]पिनदोष:=२

...नीयेसती
शेषः१

राम
१

न वैयाकरणसिद्धान्ताविषयस्तत्तत्तानं प्रयोजनं तज्जिज्ञासुरधिकारी सादिसूचितम्॥ अइउण्॥
एषां क्रमबोधकत्वेप्यादिरंत्येन सहेतेनेकवाक्यतया वृत्तिपरिच्छेदकत्वेन संज्ञासूत्रत्वं। क्रमस्य संज्ञा
द्वारे वोपयोगात्॥ एकवाक्यताचादिरकारादिरंत्येनेतासदृशेन णकारादिनासहोच्चार्यमाण
आद्यंताक्षिप्तानां संज्ञेतिस्वेोजसिला ईनामप्येतदेकवाक्यतया सुबादिसंज्ञासूत्रत्वं स्वादिविधा
यकत्वंचेतिबोध्यम्॥ एषु संहिताया अविवक्षयानसंहिताकार्यं अनुकरणत्वेन सौत्रत्वाच्चवर्णे
भ्योनविभक्त्युत्पत्तिः कारप्रत्ययोपिन। वाकुलकात्॥ यत्तु पजीव्यविरोधात्संधिर्नतथात्यजादि
संज्ञाग्रहकाले आकुणइत्याईनामनिष्पन्नत्वात्तदप्रवृत्तावविकृतरूपाकारादिषु गृहीतात्ता आदि
पदशक्तिः पश्चाद्दप्रत्याहारेत्तात्तेडपेंद्रइवात्रापि तत्प्रवृत्तौविरुध्येतानहिसंधिकार्यकृतेऽविकृत
रूपप्रत्यवर्णं भवतीतितन्न। पुनरंचपदस्यार्थांतरे शक्त्यग्रहेणतद्विरोधाभावात्। नचसंघोसंदेहः
व्याख्यानतोनिर्णयसंभवात्॥ ननुचतुर्दशसूत्र्यामक्षरसमाम्नायइतिव्यवहारानुपपत्तिराम्नायस
माम्नायशब्दयोर्वेद एवप्रसिद्धेरित्यतआह॥ माहेश्वराणीति॥ महेश्वरादागतानीत्यर्थः। महेश्व

=विकृतरूपेषु गृहे=३ =शिक्षादिरूपेत्यर्थः२ =तथा चाविकृतानामेव संहितात्म...
भावः=३

...तरस्वमिति... =२
=श्रुतिरियं तत्प्रसादलब्धेत्यर्थः=२

ल॰ श॰ शे॰ र प्रसादलब्धानीति फलितं॥ एवं चैव मानुपूर्वीका श्रुतिरेवैषा तत्समाम्नायादासा ... निना लब्धा श्रुतिमूल ... कत्वा
२ दस्यैवं वेदांगत्वं। अत्र प्रमाणं येनाक्षरसमाम्नायमधिगम्य महेश्वरात्॥ कृत्स्नं व्याकरणं प्रोक्तमिति शिक्षावचनं॥ २
लएतत्त्रेण कारविषयाचार्यप्रवृत्तिर्ज्ञापयति व्या ख्यानतरतीसा दृवाचार्यपदेन महेश्वरः। अनुबन्धाश्च महे
श्वरकृता एवेत्यनुपदं स्फुटीभविष्यति। न मङ-ऌनमित्सत्रम कारप्रसारव्यानपरं भाष्यं तु किमदृष्टार्थमेवत
दुच्चारणमुत दृष्टार्थमपीत्येवं विचारपरं। सर्वत्र प्रसा ख्यानमेवं परमेवाऽन्यथा गानामपि पारायणतो धर्म
प्रवृत्तो न तत्र तत्र पाणिनिन्यासप्रसाव्यानस्याप्रसंगतिः स्यात्॥ तदुक्तमिको यणचीति सूत्रे। सामर्थ्ययोगा
न्न हि किंचिदत्र पश्यामि शास्त्रे यदनर्थकं स्यादिति। किंचिददृष्टादृष्टार्थवत् किंचित्तु ... दृष्टार्थवत्। सर्वथाप्य
नर्थकं न किंचिदिति तदर्थः॥ वृत्तिसूत्रस्यैव वर्णेनाप्यनर्थकेन न भवितव्यमिति भाष्यं येऽनर्थकत्वं बोध्या
र्थराहित्यरूपमिति न निष्प्रयोजनत्वरूपानर्थकेन तत्र तत्र प्रसारव्यानभाष्यासंगतिः॥ अत एव वृत्तीयमक्षर
समाम्नायः पुष्पितः फलितश्चन्द्रतारकवत्प्रतिमण्डितो ब्रह्मराशिरिति भाष्यमुपादायोक्तं हरिणा॥ राम
वृथैव वेदमञ्जुषि... चन्द्रतारकादिवदेवमस्याक्षरसमाम्नायस्यानकस्मिदाधुनिकः कर्तास्त्येवमेव वेदपारं
पर्येणास्मर्यमाणमिति॥ आधुनिकः शरीरी। पुष्पितत्वं तन्मूलकशब्दशास्त्रद्वारेण शब्दप्रयोगेणाचफलि २

=ऽकानुपूर्वीके प्रेवं=२

तत्वं उक्तं चैतच्चतुर्दशसूत्रव्याख्यायां नंदिकेश्वरकृतकाशिकायां नृत्तावसाने नटराजराजो नना
द ढक्कां नवपंचवारं ॥ उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालं ॥ अत्र सर्वत्र सूत्रेषु
अंत्यं वर्णं चतुर्दशं। धात्वर्थं समुपादिष्टं पाणिन्यादीष्टसिद्धये इति। धात्वर्थो। धातुः मूलं कः शब्द
शास्त्रप्रवृत्त्यर्थम्। अंतएवानुबंधकरणार्थं च वर्णानामुपदेशाद् इत्युक्तं भाष्ये। अत्र करणशब्दप्रयो
गेणानुबंधानां सादित्वं सूचितम्। तत्करणं चोपदेशाकर्तृकर्तृकमेव प्रसासत्तेः तेन द्यतिरिक्त
स्य सर्वस्यानादित्वं सूचितम्॥ अत्र सनकाद्युद्धरणेच्छया ऽस्य ब्रह्मोपदेशत्वमपि सूचितं। तच्च
श्रुतित्वाभावेन संगच्छते। श्रोतव्यः श्रुतिवाक्येभ्य इत्युक्तेः। उक्तं त्र आकरतोऽशाकटायनो
पि इदमुक्तं छंदोवर्णाः समनुक्रांतं यथाचार्योक्तं चतुर्ब्रह्मा बृहस्पतये प्रोवाच बृहस्पतिरिं
द्राय इंद्रो भरद्वाजाय भरद्वाज ऋषिभ्य ऋषयो ब्राह्मणेभ्यः तं खल्विमम् अक्षरसमाम्नायमित्याच
क्षते न भुक्त्वा न नक्तं प्रब्रूयाद् ब्रह्मराशिरिति। ब्रह्मप्रतिपादको वर्णराशिरित्यर्थः। तत्वं च नंदिकेश्व
रकृतकाशिकायां स्पष्टमेतदेव। वृत्तिसमवायार्थो वर्णानामुपदेशः कर्तव्य इति भाष्ये उक्तम्।

ल॰शा॰शे॰ पाणिनेर्लाघवेन शास्त्रप्रवृत्तिफलको यः समवायो वर्णानां क्रमेणानिवेशस्तदर्थ इति तदर्थः। स चाणादि
२ प्रत्याहारद्वारा शास्त्रप्रवृत्त्यर्थः। एवं चायमुपदेशः पाणिनेरन्यकृत इति स्पष्टमेवोक्तं। मंत्रोपदेशवदिति व
चात्रोपदेशपदप्रयोगोऽ तएवास्य ज्ञाने सर्ववेदपारायणजं पुण्यं फलमिति भाष्ये उक्तं। व्याकरण
मुपक्रम्य वेदानां वेद इति छांदोग्यश्रुतिरप्येतत्परैवेति दिक्। तत्प्रयोजनमाह। संज्ञार्थानीति। एतच्चोप
पादितं। संज्ञाप्रणयनं च लाघवेन शास्त्रप्रवृत्त्यर्थमिति बोध्यम्॥ संज्ञार्थत्वोपपत्तये आह एषामिति।
अकारस्येति इति न प्रत्याहारसिद्धिः अनंतस्याप्युक्तिः इदं तु व्याप्यस्य सूत्रस्यैकैयटानुरोधेन। परे त्वस्या
नुनासिकत्वेऽतो नेति सूत्रे पाणिनिर्लकारं नोच्चारयेत्। प्रत्याहारेऽपि वर्णिर्वीहात॥ किंचास्येत्संज्ञकत्वेय
एचघटितसूत्रेषु बहुषु अर्द्धमात्रालाघवानुरोधेन यप्रत्याहारे लोवव्यवहरेत्॥ किंचानुबंधानामच्
प्रत्याहारे ग्रहणाभावे औचारादप्रधानत्वाच्चोपस्यवत्त्वतरइति भाष्योक्तस्यत्त्वनीयहेतोरव्यापक
त्वापत्तिः तवलोपस्य बलवत्त्वेपिह प्रत्याहारसिद्धेः प्राग्व्यवदार्थे निष्पत्त्यभावे नोपदेशजित्स्यवा राम
क्यार्थाभावेन लणोस कार[redacted]स्येत्संज्ञालोपयोरभावे न प्रत्याहारेषु जातिग्रहणपक्षस्यैव भाष्यकृ २

नासिक्यांतितत्वेनहल्प्रत्याहारेलणिसकारप्रवेशोमामींसांस्त्विहसत्रानुनासिकपक्षेनुस्वारापत्तिर्दुर्वारा।
[redacted] सोस्त्रीत्यादौसुत्वोपाद्यापत्तिश्च। अतएवप्रत्याहारेऽनुबंधानांकथमज्ग्रहतोषुनेसनेन
प्रत्याहारेवर्तीसमाम्नाये। यएतेऽक्षुअज्बोधकसूत्रेषुप्रत्याहारार्थाअनुबंधाः क्रियंतेतेषामज्ग्रह
णेनग्रहणंकस्मान्नस्यर्थकेनाचप्रत्याहारेशंकाकृतानहल्प्रत्याहारे। भाष्येचादूउणित्यादिसूत्रेचतु
र्दशयोपादानेनैवास्यप्रवृत्तिर्दर्शिता। तत्रप्राधान्यंप्रत्याहारेषुग्रहणार्थत्वरूपम्। हल्षुचतथोपदेशात्तेषां
अक्षुतुस्वराणामेवतथोपदेशइतिप्राधान्यात्तेषामेवसंज्ञित्वमितिभाष्येस्पष्टम्। नचहशादिप्रत्याहा
रेटग्रहणस्यापत्तिरितिवाच्यं। हकारादिषुपुनःपुनरकारोच्चारणेनउच्चारणार्थवर्णरहित
हल्तंतपू[redacted] घटितप्रत्याहारेग्रहणाभावस्यवक्तुं शक्यत्वात्। नद्विविधप्रयोगाणामनभिधाना
स्या च्च। तस्मादनुनासिकत्वमप्रामाणिकं। उरण्रपरइसूत्रेलग्रहणंकर्त्तव्यमेवऋलवर्णयोःसावर्ण्य
तो २ वदिसाहुः। ननुहयेत्याद्यवकाशचरणेनतस्यहल्त्वप्रसंगोतआह। हकारादिष्विति॥ नपुनरेतरेण
चव्यंजनस्योच्चारणमपिभवतीत्युच्चैरुक्तानइतिसूत्रस्यभाष्यात्॥ एषाव्याचार्यस्यशैलीलक्ष्यते
यत्तुल्यजातीयांस्तुल्यजातीयेषुउपदिशतिअचोऽक्षुहलोहल्षुइतिप्रत्याहारेऽनुबंधानामित्यत्र

ल०श०शे०
४

भाष्याद्येति भावः॥ स्यादेतत्॥ नविमेत्वावित्यादेः सार्थक्याय हलंत्यमित्यस्योपदेशेंत्यं हलिति इत्यर्थो वश्य
कस्तेन हलंत्यमादिरंत्येनेत्यनयोः परस्परापेक्षत्वेनान्योन्याश्रयाद्भकारेत्संज्ञामबोधयित्वा हलामित्संज्ञा
बोधनं पाणिनेरयुक्तम्॥ न च हयवरेत्सादेराशाषसरित्यं तत्समुदायमुद्दिश्य हलित्यनेन हल्संज्ञापि
विधेयेति वाच्यम्॥ दशसूत्रावृत्तौ गौरवात्॥ ननूपदेशेऽद्दंत्यं। अच्। अनुनासिक इति सूत्रत्रयमस्तु
अजित्यनेन सार्थे। तृतीयेऽजित्यनुवृत्तिसामर्थ्यादच्येदिद्भवेति तर्ह्यऽनुनासिक एवेति नियमाश्रय
णात्तदंशे प्रवृत्तौ न दोषो योगविभागसामर्थ्याद्व्यानंतरस्येति न्यायं बाधित्वा व्यवहितस्यापि तेन नियमः
मिदचोंत्यादिति ज्ञापकाच्चानेन विपरीतनियमः। एवं च हल्ग्रहणमपि व्यर्थमन्योन्याश्रयश्च न। न च पाणि
निसूत्रभेदपारायणादावदृष्टहानिः। तथा च तत्र तत्र भाष्यमपाणिनीयं तु भवतीति वाच्यं॥ कल्प्य
मानन्यासस्य लघुत्वेऽस्या दोषत्वात्। सूत्रभेदं तमुपाश्रयंति यत्र तदेवान्यत्सूत्रं क्रियते भूयो वा यदि
तदेवोपसंहृत्य क्रियते नासौ सूत्रभेद इत्यसचेदुपसर्गो न इति सूत्रभाष्यात्। नासौ सूत्रभेद इत्यस्य
दोषायेति शेषः। सति संभवे दृष्टत्वादेवांगानामदृष्टापेक्षत्वमिति तदाशयः। अत एव तत्र तत्र ज्ञाप राम
कपरसकलभाष्योच्छेदेनेति चेन्न० योगविभागनियमज्ञापकाश्रयणेऽति गौरवात्॥ न हि वर्णानामिक्य ४

क्तिज्ञानजनकं कण्ठाद्यभिघातगौरवमेवादर्त्तव्यं। न तु ज्ञानजनकमनोव्यापारगौरवमिति राजानाक्ति। नचस
आसमंतात्तगच्छतीतिसहेताम प्यभाववर्णाइत्यर्थ इत्सतोनान्योन्याश्रय इति वाच्यम्॥ अन्योन्याश्रयतत्प
रिहारादीन् वदता भाष्यकारेण कटीवासत्रप्रक्लिष्टादौ ङुणत्वाविस्तत इणत्वाविस्तत भ्रसणाङ्पूर्वा
त्त जभावबोधनात्। किंच योगमर्यादया ततउक्तार्थलाभः आसमंतादित्यस्यानन्वितार्थत्वं व्यर्थेलं
चाल्लक्षितुनमानमतः सूत्राद्वयातं परिहरति। हलंत्यमिति। भाष्ये प्यन्योन्याश्रयमाशंक्य हलंत्यमि
त्संज्ञं भवति लकारस्त्वभवतीति वक्तव्यमित्युक्ता एकशेषनिर्देशाद्वासिद्धं हल् च हल् च हलौ हलंत्यमिदित्युक्तं
तस्यायं भावः। कृतैकशेषेण हल्पदेन संबंधसमान्यषष्ठ्यासमासो हलशब्दस्य चेदं यातेश्रूयमाणत्ये
बोभयत्रान्वयः॥ एवं च हलस्सूत्रांत्यं हलंत्यं संचेति बोधः। अंत्येरा होः शिर इतिवत्षष्ठीति॥ अत्रोच्चा
रयितुरेकशेषनिर्देशो बोद्धृस्त्वावृत्त्याबोधः। हसमीपोलकार इत हलंत्यांस्यं चेति केचिदो क्तव्यायां व्या
तु हलित्संज्ञं भवति हलं संचेदिति वदेदित्सलघम्॥ नन्वेवमपि न विभक्ताविति विभक्तिपदबोध्यसुप्ति
ङ्बोधो हलंत्यमिति वाक्यार्थबोधोत्तरमत न द्वाधस्याअपवादवाक्यार्थबोधोत्तरमित्यन्योन्याश्रयस्तदवस्थ
एवेतिचेन्न। अपवादवाक्यार्थबोधात्पूर्वं पदपदार्थोपस्थितावुत्सर्गवाक्यार्थबोधे प्रतिबंधकाभावात्
॥ न च भावत्तानेप्रतियोगितानस्य व प्रतियोगितानेऽभावत्तानस्य कारणताकस्यापि संमतता। प्रति

४ वै यथा यस्मात् ततः पूर्वं अपवादशास्त्र इति मूलं ३

ल॰शे॰शे॰ योगिज्ञानं विनानिषेधवाक्यार्थासंभवाच्च पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गा इत्यस्यायं भावः। लक्ष
५ लौकिकचक्षुष्कस्य उद्देश्यतावच्छेदकावच्छिन्ने सर्वत्रोत्सर्गः कृतसंस्कार बुद्ध्या उत्सर्गापवादयोर्विषयव्यवस्था
नापन्ना मुक्तवन्तं प्रति मा भुङ्क्ष्व इति वाक्यस्येवापवादशास्त्रपर्यालोचनेन तद्विषयलक्ष्यसंस्कारं निर्लोप्य स्य ३
५ तद्विषयं तन्त्र लक्ष्यं तत्तद्विषयवाक्योपप्लुवधारोत्सर्गेण संस्करोति। अन्यथा विकल्पापत्तिरिति। यद्यपि
भुक्तवंतं प्रतीति न्यायो लुगादिना जातनिवृत्ते अभिचरितस्तथापि तत्राप्यनुत्पत्तिरेवेति न दोषः। न्यायान
गीकारेऽपि विकल्पापत्तेः सत्वाच्च। अभिनिविशन्त इत्यस्य बुध्यारूढा भवन्तीत्यर्थः। लक्ष्यैकचक्षुष्कस्तु
तच्छास्त्रपर्यालोचनं विनापि अपवादविषयं परित्यज्योत्सर्गेण लक्ष्यसंस्कारं जानीते तस्यापि शास्त्रप्र
क्रियास्मरणपूर्वकं प्रयोग एव धर्मोत्पत्तेः तदुक्तम्। प्रकल्प्यापवादविषयमुत्सर्गः प्रवर्तते इति। प्रकल्प्य
परित्यज्य। यत्तु प्रैके स्यावेत्यस्यायमर्थः। यथा न संप्रसारणे इति वचनात्परस्य यणः पूर्वं संप्रसारणं
पूर्वस्य तु तन्निमित्तप्रतिषेध इति अभ्यस्तसंज्ञासूत्रे कैयटस्तन्न। न संप्रसारणे इति सूत्रस्थभाष्यविरोधा २४
त्।। तत्र हि एतदेव ज्ञापयति परस्य न पूर्वस्येति।। यद्वा।। संप्रसारणाश्रयस्य प्रतिषेध इत्यत्रायुक्तम्। नहि
न्यायेन सिद्धे एवमुक्तिरुचिता।। तस्मान्न्यायस्य मूलं उक्तमेव विषय इति बोध्यम्।। यदप्यपवादवाक्या राम
र्थं विना नोत्सर्गवाक्यार्थ इति तदर्थसत्वदपि न।। उक्तयुक्तेः। न विमक्तौ तुस्मा इति शास्त्रपदार्थज्ञानमात्रेण ५

पादीनामेतद्विषयत्वाभाववृद्ध्यातेषु ग्रहणं सत्रत्र प्रत्याहारसूत्रे उक्तरूपविभक्तिपदार्थज्ञानं सुलभमिति दिक् ॥ अ॒
त्राप्युपदेशः इति संबध्यते तच्छलभ्यमाह सत्र इति ॥ आदिरन्त्येन ॥ आदिरिति किं । अन्त्यशब्देन पूर्वं यामा
अ२ क्षेपादिगादिप्रत्याहारे ककारादिग्रहणं मा भूदिति । एवमादिशब्देन परे यामाक्षेपात् इणादिप्रत्याहा
रे षुकारादीनां ग्रहणं मा भूदिति संज्ञेनेति । उभयोपादाने तु अयमादिरन्तो वेत्युक्ते अवशिष्टमपि किंचिद् दृश्येत्
ति नियमेन प्रतीतेः परस्मिन्सति यस्मात्पूर्वो नास्ति स आदिः पूर्वस्मिन्सति यस्मात्परो नास्ति सोऽन्त्य इति
अकारादिग्रहणे इकारणकारादीनामाद्यन्तत्वस्यैवानापत्तेः । अत्राद्यन्तपदाभ्यामवयवत्वेन बोधका
भ्यां स्वघटितः समुदाय आक्षिप्तः संज्ञी । तस्य चलक्ष्ये प्रयोगाभावात्सर्वेकसंज्ञित्वमं तस्य तु नतत्का
र्यं तस्येत्संज्ञालोपाभ्यामपहारात् । एतत्फलितकथनमेव भाष्ये मूले च स्वस्य च रूपस्येति स्वमित्यनु
वृत्तिपरत्वेन व्याख्यानं तु हेयमेव अनुवृत्तौ फलाभावात् । इतेति किं । ञमङणनेति णकारादिभिः प्र
त्याहारो मा भूदिति । सह ग्रहणात्स्वसमुदाय एव संज्ञेति समुदायादेवेकवचनादौ विभक्त्युत्पत्तिर्लोपादिमा
ःपा३ त्रात् ॥ न चान्त्यस्येत्संज्ञालोपाभ्यामपहारादिरन्त्येनेत्यसंगतम् ॥ तत्रैव वृत्तिसंज्ञायामपि इगादिशब्दे :
षु तद्भावात् ॥ अन्त्येनेत्यस्येदं त्यसदृशेनेत्यर्थात् ॥ व्यक्तिपक्ष एवमेवोचितः सादृश्यमूलिकैव चा
त्र तत्प्रसमिज्ञेत्याहुः ॥ अचिष्णुधातिति सूत्रे इणाद्युत्सेवसिद्धे यो रिति निर्देशादिणपरेत्तो वेत्ति लणस

ल॰शा॰शे॰ त्रे भाष्ये स्पष्टम्। हलंत्यम्॥ अत्र पदद्वयम्॥ समासे त्वंत्यशब्दस्य पूर्वनिपातापत्तेः कर्मधारये योग्यपदार्थासं
६ मासाभावस्य त्वत्र कार[illegible] शैलीसिद्धत्वाच्च॥ यद्यपि सर्वोपि हलंतं समुदायं प्रत्यंत्यो भवति तथाप्यंत्यपदो
6 पदेशपदाभ्यां प्रत्यासत्त्यांत्यात् तत्त्वत्वरूपज्ञापकोच्चारणविषयसमुदायं प्रत्यंत्य इह गृह्यते अत एव मकारे
त्संज्ञापरित्राणार्थस्य मोरूकारश्चरितार्थः। समुदायोपदेश एव सर्वत्र रूषितार्थेणाऽवयवानां नां
तरीयकतया तेषामन्त्यात [illegible] त्वत्वरूपज्ञापकत्वाभावात्। उपदेशे इत्यमिति। तत्र विद्यमानमंत्यमित्यर्थः।
तेन अइउण् इत्यादौ णादीनां हल्न्त्या हारसिध्युत्तरं तत्सिद्धिः। अन्यत्र लंतरं गत्वा सायउच्चारणेना
भिव्यक्तस्य तदव्यवधानेनैवेत्संज्ञा। पदार्थोपस्थितिरनुबंधविनिर्मुक्तस्यैव। उपदेशोत्तरकाले त्संज्ञेतिना
न्तरूलाविति सूत्रे भाष्यात्॥ धुडिसादौ सानुबंधादिमक्तिस्तुतेनैवानुबंधविनिर्मुक्तोपस्थिते तस्यैवार्थ
वत्वात्तुलमा॥ इत्संज्ञाकार्यं तु यत्र स[illegible]र्थ क्यात् तदुपस्थाप्यए वा। स्यघंचे दं ति त्स्व रि तमिति
सूत्रे कैयटेवेय्याकरणे चित्स्वरस्तुन। तस्येत्त्वकारसंदृशलेपि तत्त्वाभावात्। विभक्त्यादिसंज्ञापि सूत्रां
तर्गतानामेवेति तत्रैव नविभक्तौ विसादीनां भवंति। अत एवेदमुत्थिसादाव एतत्स्व वर्णग्रहणं प्रा
शमप्रत्ययइत्यनेन निषिध्यत इति भाष्योक्तं संगच्छते। यत्तनेकाल्सूत्रेइ शिशिज्ग्रहणाभावेपि शित्करणा राम
देव सर्वादेशत्वमिति भाष्ये उक्तं। तस्येत्संज्ञकशकारकरणान्भूतपूर्वानेकाल्त्वमादाय सर्वादेशत्वमित ६

र्थ इति नतद्विरोधः। अत्र केचिदनुबंधा अनेकांताः अनवयवाः योह्येकांतः कदाचित्तत्रोपलभ्यते एवायं
तु न तथा। तदर्थमेतेविधेये कदाप्यदर्शनात्। हलंत्यमिति सूत्रं तत्राब्दः परसमीपबोधकस्तु दूरस्थादावा
दिशाब्दः पूर्वसमापबोधकोऽनेकाल् शिदि सर्वस्येति समीपे सामीप्यमलकावयववत्वारोपेण बहुव्रीहिः। स्प
ष्टं चेदमुपदेशे जिति सूत्रे भाष्ये मपर्यंतस्येति सूत्रे कैयटे च। तेन डाणलादौ विशादौ च न दोषः। अत ए
वोपदेशे जिति सूत्रे उपदेशग्रहणं चरितार्थं। तद्धि अमुञ्ओअप्टित इत्यादावादित्वप्रतीतिप्रतिषेधाभा
वाय॥ अनेकांतत्वे हि तस्याभिरित्याहुः। परे त्वेकांता एव शास्त्रे तत्रोपलंभादस्य त्वनुपलंभोऽस्तु। अनव
यवो हि काकादिरेकजातीयसंबंधेन गृहवृक्षादिषूपलभ्यते नैवमयं। किंचानवयवत्वेण शाकप्रसंख्या
दौणादेरित्वानापत्तिः प्रत्ययादित्वाभावात्। एवमेकत्वाभावादिशादेः शस्येत्वानापत्तिः। उक्तार्थला
स्तानि कत्वे तु लक्षणे वदोषः। किंचदक्षचमत्कारवैयर्थ्यापत्त्याऽवयवत्वमेवन्याय्यम्। अत एव तुनेरु
एर कक्ष जिति सूत्रे विहितके णित्वप्रयुक्त वृद्धिर्नैतस्य लोप इति भाष्ये एकांतत्वमेव न्याय्यमित्युक्तेश्चोपदे
शे जिति सूत्रे उपदेशग्रहणं तु स्पष्टार्थमेवत्याहुः। सर्वत्रानुबंधसहितनिर्देशविधौ नुपित्ञिद्दित्यादो
नकारेत्संज्ञकः सोभवतीत्यादिक्रमेण बोधः। अनुवादे सन्यत इत्यादौ च नकारेत्संज्ञकसशब्दपरे
इत्यादिक्रमेण बोधः स्पष्टं चेदं निष्ठासंज्ञासूत्रे भाष्ये। अत एवाटश्चेत्यादेर्नासे गतिः। अन्यथा यत्रा

ल·श·शे०

७

इत्सूत्रे तत्र नाचरो नेष्यते च तत्र वृद्धिः यत्र प्रयोगे दृश्यते वृद्धिस्तत्र नाप्तिरिति तदसंगतिः स्पष्टैव॥ अंस किं।
वाचालः। ह[redacted]ल्किं चिरिणोतीत्यादौ धातोरंशस्य मा भूत्. आद्योच्चारणमिति। आद्यमुच्चारणमित्यर्थः।
भावे घञिति भावः। तच्च प्रत्यासत्तेत् शास्त्रप्रवर्तकाचार्योच्चारणमेव। आद्यसंज्ञा ज्ञातस्य स्वरूपज्ञापकत्वं।
उपस्थाप्यं पैत्वादिशेषुच्चारणक्रियत्वात्॥ अतएव एकाच उपदेश इति सूत्रे कैयटेनोक्तं। मित्संज्ञावि
धानुच्चारणवचनउपदिष्टोऽर्हस्तेति। आदेच इति सूत्रे पिपेषां स्वरूपज्ञापनायापूर्वमुच्चारणं ते
षामेवोपदेशव्यवहार इति। तत्र सूत्रे भाष्ये [redacted] पिउद्देशश्च प्रातिपदिकानां नोपदेश इति प्रवृत्तः सूत्रे भा
ष्येपि प्रत्यक्षमाख्यानमुपदेश इत्युक्तं। तस्य चोक्त एवार्थः। परे तु उपदेश इति किमर्थमग्रओं अपः कः
पुनरुद्देशोपदेशयोर्विशेष इति भाष्ये उक्तम्। यद्धि प्रत्यक्षमाख्यानमुपदेशो गुणैः प्रापणमुद्देशस्तर्हि
ल्टटः सद्व्यानिष्ठेति विहितानां शतृशानच्कसकवतूनामव्ययकसेत्संज्ञानापत्तिः तथा राजसूयसूर्यचित्सा
[redacted]ग्निचित्सेसा[redacted]दिनिपातनानुमित[redacted]क्यबादीनां पादेरितानापत्तिः वदः सुपीत्यत्रोच्चारितत्वेनेत
त्संबंधी अतएव तस्यापसमत[redacted]इञिति न्यासेऽन्यशब्दसंबद्धापसार्थस्यानुक्तत्वरूपं शेषत्वमुक्तमा राम
करे। तस्मादत्र सूत्रे उपदेशनोद्देशस्यापि ग्रहणं वक्तव्यं। एवं चाग्रओं अपइत्यादावपि प्राप्नोतीति तेषां ७

संग्रहोऽ स्य व्यावृत्तिर्भवति येन सविशेषः क इति प्रश्नः। तत्संग्रहार्थमेव लोकव्यवहारेणापि तयोः संकी
र्त्तौ समुपपाद्येत व्यावृत्तये तत्संग्रहाय चोपदेशेऽजनुनासिक इति कर्त्तव्यं किं पुनरुपदेशग्रहणं शास्त्रमित्युक्तं प२
वार्त्तिककृता॥ तत्र शास्त्रपदेन प्रयोगशासनकरणभूताः धातुप्रातिपदिकप्रत्ययनिपातागमादेशा हलं
त्यसूत्रे व्यवसितपदार्थत्वेन भाष्ये उक्ता गृह्यंते। एवं च तत्संग्रहोऽत्र ओं इत्येतद्व्यावृत्तिश्च सिद्धा॥ तस्य च
वार्त्तिकस्य बाहुलकाकरणेऽघञ्प्रसारव्याख्यानं भगवता कृतम्॥ किं च॥ हलंत्यसूत्रे भावघञंतोपदेशपदा
नुवृत्तौ भवतष्ठकृच्छ्साविलादिविहिते ष्विसंज्ञानापत्तिः। परस्परसत्त्वेनैकादेशसत्त्वाभावात्। यदि तूप
देशे प्रत्ययत्वादिविशिष्टांत्यइदित्यर्थ उच्यते तदोपदेश इति व्यर्थं। अंत्यपदसामर्थ्येनैव तल्लाभात्।
अत एवात्र सूत्रे उपदेशग्रहणस्यानुबंधा अनेकांता इत्यस्थितपक्षेऽत्र ओं अटित इति प्रयोजनमु
क्तं न तूत्तरार्थमित्युक्तं। न च करणसाधनोपदेशशब्दानुसंधानसिद्ध हलंत्यसूत्रे व्यवसितांत्यमिति वक्तव्यं द८
न केपुं व्यवसिता धातुप्रातिपदिकप्रत्ययनिपातागमादेशा इति वार्त्तिकानुत्थानमिति वाच्यम्। समुदाय
द्वारावयवस्याप्युपदेशकरणत्वात्तदंत्यस्यापि लोपापत्तिरित्याशयात्। भाष्यकृता चात्र ग्रहणसामर्थ्येन
प्रसारव्यातं तत्रानुबंधविशिष्टानां धातुत्वादि [redacted] नुधातुत्वादियोग्यघटितत्वाबोध्यम्। निपातानां

ल·श·शे· द्योतकत्वेनाप्राप्तत्वसिद्ध्यायेन च पृथक्ग्रहणं। अव्यवसितत्वं च धात्वाहादिना परिच्छिन्नत्वात् इति कैयटः॥
८ एवं चोदश्विदादिप्रातिपदिकांतस्यापि लोपः प्राप्नोतीति प्रातिपदिकानां प्रतिषेधो वाच्यो ऽकृत्तद्धितानां
नामिति वार्त्तिककृतोक्तम्॥ कुंभकारइत्यादौ अपवादविषयपरिहारेणोत्सर्गप्रवृत्तेः पूर्वं प्रातिपदिक
त्वेणादित्सोपो न स्यादिति अनेकद्विलादितच्चफलाभावान्नेत्संज्ञेत्यादिना भाष्ये प्रत्याख्यातं। अत्रार्थोच्चा
रणार्थेको पदेशपदानुवृत्तौ तस्य वार्त्तिकस्यानुत्थानमेव स्यात्। उद्देश्यअप्रातिपदिकानां नोपदेश
इत्यादेश्च इति सूत्रभाष्योक्तेः। एतद्भाष्यैकवाक्यतया पस्पशाह्निकांतस्य ऽग्रहणप्रातिपदिकाना
मुपदेशः कर्त्तव्यो मंचको मंजक इति मा भूदिति भाष्ये उपदेशशब्दो ग्रहणं कर्त्तव्यमित्यर्थकः। त
च्चानुरूपवादेमेव सदेह निवर्त्तकमिति बोध्यम्॥ नन्वेवं तस्मिन्निति निर्दिष्ट इति सूत्रे षष्ठी प्रक
ल्पकत्वं तस्येति पक्षे गुप्तिज्किद्भ्य इत्यादावपि षष्ठीप्रकल्पस्यापत्तिः। न च सनः सन्नेवादेशो भवि
ष्यतीति बाधकाभाव इति वाच्यम्॥ उपदेश इत्युच्चमानेत्संज्ञा न प्रकल्प्येते सुक्तं भाष्ये तद्धि रुध्ये
तात्रोपदेशपदानुवृत्तावितिचेन्न। तस्यैकदेशयुक्तित्वेनासाधकत्वात्॥ तथाहि तत्र ङमो ह्रस्वा
दची सादेीयत्र सप्तमी पंचमी चेत्सुमयं निर्दिष्टपनेतत्र किं पूर्वस्य कार्यम् उत परस्येति संदेह परस्ता राम ८

नवकाशत्वाभ्यां पंचमीनिर्देशो बलवानिति सिद्धांतिनोक्तम्। तत एकदेशिना यथार्थवा षष्ठीनिर्देशः
कर्त्तव्य इति समाधानांतरमुक्तं यथाविषयं प्रयुक्तेषु कार्यिणः षष्ठ्या निर्देश्यादिति तदर्थः ::ति षु सप्तमी
गं३ निर्देशस्य क्वचित्सर्वत्र क्वचिद् दुरत्रावश्यकत्वेनोभयनिर्देशगौरवे तत्रैकदेश्युक्तिः। ततः परे त्वेकदेशिना
षष्ठीपदानुवृत्त्यात स्मिन्निति सादरैव षष्ठीप्रकल्पकत्वमाश्रित्य यथार्थवा षष्ठीत्येकदेश्युक्तिः प्रसारव्याता
।षष्ठीपदानुवृत्तो गौरवादुभयोः प्रकल्पकत्ववारणाय परत्वान्नवकाशत्वयोरेकः पूर्वपरयोरिति पूर्व
परत्र हणस्य युगपत्प्रकल्पकत्वाभावे त्वापकस्यैवश्यकत्वाच्चेयमप्येकदेश्युक्तिः। ततः पूर्वत्वेकदेशि वा६
नातस्मिन्निति सादेशदोषः शंकितः। ततः षष्ठीप्रक्लृप्तिवादिनैकदेशिनोक्तं स्यादेष दोषो यदीत्सं
ज्ञा आदेशं प्रतीक्षेत तत्र खलु कृतायामित्संज्ञायां लोपे च कृते आदेशो भविष्यति डपदेश इति ही त्संज्ञो
च्यते इति। एवं च त्वदुक्तिर्व्यर्थाह तस्याशयः। तदग्रे उपदेशपदानुवृत्तिमभिप्रेत्याप्यवानानुसन्धेस्मिन्निति प्र
क्लृप्त्याभवितव्यं यदा चोत्सन्नः सन् तदाकृतसामर्थ्यात्पंचमीति प्रक्लृप्तिर्न भविष्यतीति समाधानां
तरकृतम्॥ तत्र परत्वविशिष्टस्य सनेऽसादेनेपंचम्या उपक्षयात्स्थ संतराभावान्नास्ति तस्याः प्रकल्पकत्व क२
मिति तदर्थं कैयट आह॥ एवं च प्रकृतस्त्रस्थस्य सूत्रार्थप्रतिपिपादयिषया प्रवृत्तस्य भाष्यवार्त्तिकस्ये

ल॰ श॰ शे॰ कृदेकदेशत्वाभावबलेन प्रौढिवादकत्वकल्पनं नोचितं लक्ष्यासिद्धेश्च। अइउण् इत्यादीनामपि क्रमबोधकत्वे
२ नार्थवत्त्वात्प्रातिपदिकत्वम्॥ चित्रङ्ग्वोः कुरिसादेरपि प्रातिपदिकत्वं। लोपश्चेत्तत्रापि शाकल्यस्य स्वरूपे
१ पिणार्थवत्त्वात्प्रातिपदिकत्वेऽनुबन्धानामेकान्तत्वे तु लोपोपि सतो लोपग्रहणेनुवर्त्तमाने पुनर्लोपग्रहणा
त्सर्वादेशत्वं बोध्यं। एकाच उपदेश इत्यादिसूत्रस्थः कैयटोपि चिंत्य एव अन्योपि तज्जातीयश्चिंत्य एव। एकाच उपदेशे
आदेच उपदेशे इत्यादौ तु भावसाधन एवेति सुधियो भावयन्तीत्याहुः॥ ननु शास्त्रेनुनासिकोच्चारणाभावा
त्तत्स्थानं दुर्ज्ञेयमत आह। प्रतिज्ञेति। प्रतिज्ञाविषयानुनासिक्यवंत इत्यर्थः। पाणिनीया इत्यस्य पाणिनि
प्रभृतिशिष्टा वर्णा इत्यर्थः। प्रतिज्ञायायामेवमिति कथनं वर्णानां तत्तत्प्रकोव्यवहारश्च ताभ्यां तत्तज्ज्ञा
नं सुलभमिति भावः॥ प्रतिज्ञानाश्च प्रमाणत्वे तच्छास्त्रकर्त्ता र एवेति दिक्। निर्देशादिति। तेषां ते
त्र ग्रहणे हि नासिकादौ यणापत्तिरिति भावः। न चेत्तद्विधानसामर्थ्यात्तु यणभावः सिद्धः। तस्यापि प्रसा
रणेष्वनुबन्धाग्रहणज्ञापनद्वारैव यणभावकल्पकत्वौचित्यात्। तोक्षाच्छास्त्राधकल्पनापेक्षयास्या
र्थस्यौचित्यात्॥ निर्देशादिस्य पतञ्जलिमते तद्विधानसामर्थ्यादित्यर्थ इति तात्पर्यं। आ दिनात्त्रपि राम
रुषिक्रुषेरेकः पूर्वस्यादिसंग्रहः॥ ननु प्रसारणे नुबन्धानां कथमग्रहणं एषु नेति वार्त्तिके प्रसा २

हारश्चाद्बस्य वर्णसमाम्नाये प्रसिद्धेः प्रत्याहारेष्वितामिसननुपपन्नमत आह ॥ आदिरन्त्येनेतीति वार्त्ति-
केतादर्थ्यात्ताच्छब्द्यमिति भावः ॥ ऊकालोऽच् ॥ कुक्कुटरुते उकारे एकद्वित्रिमात्रत्वप्रसिद्धेरुकारा द-
यो नोक्ताः । ऊ ऊ३ इति एकद्वित्रिमात्राणां क्रमेण प्रश्लिष्टनिर्देशो व्याख्यानात् तत्तन्त्वोच्चारणकाल-
सदृशो लक्ष्यते स कालो यस्येति बहुव्रीहिस्तत्फलितमाह ह्र अज्झ ऊज्झेति । ननु ऊ कालोऽच् ह्र-
स्व इति वाक्ये अणा वा सवर्णग्रहणे द्वित्रिमात्रयोरपि ह्रस्वसंज्ञायां प्रदाय प्लूये सादौ ह्रस्वस्ये-
ति तुक् स्यादिति चेन्न ऊ अणित्सवर्णग्रहणसामर्थ्यादूस इत्यो जिसर्वे सादृश्यस्य व्याख्यानात्का-
लहृतस्यैव ग्रहणमिति सिद्धे अधिकं कालग्रहणमुच्चरितसंबंधिकालं दृष्ट्वा कालकस्यैव सं- सप
स५ ज्ञा न तु तेन गृहीतसंबंधिकालं दृष्ट्वा कालकस्यापीत्यर्थेनादोषात् ॥ तदुक्तं भाष्ये । यावत्त-
परकरणं तावदत्र कालग्रहणमिति । नन्वाजिति वर्णग्रहणे जातिग्रहणस्य दुर्वारत्वात्तित उ-
च्छत्रमित्यत्र दीर्घात्पदान्ताद्वेति तुगापत्तिरिति वाच्यम् । ज्ञापकसिद्धत्वेनैतस्यासार्वत्रिकत्वात् ॥
अंतरंगत्वेन ह्रस्वत्वनिमित्तनित्यस्तुक एव प्राप्तेश्च । अच्ग्रहणं प्रत्यक्षे सादौ ह्रस्वस्येति तुग्व्या-
वृत्त्यर्थं । उच्चैरुदात्तः ॥ मात्रश्रुतिकृतमुच्चत्वमुपांशुप्रयोगे व्याप्तेः । श्रुतिप्रकर्षस्याव्यवस्थि-

ल॰ शा॰ शे॰ न्त्वाच्चा। किंतुस्यान न्तत्वं तं हु त्रैरित्यधिकरणशक्तिप्रधानमधिकरणत्वं चोच्चारणं प्रतितच्च ना त्वादीनां सभा
१० न्वे एवे साशयेनाह॥ ताल्वादीति। इदं प्राचामनु[illegible]रोधेन॥ वर्णसमाम्नाये ऽकारस्य प्राथम्यात्कंठादीति
10 वत्तुमुचितं। एवमन्यत्रापि बोध्यं। प्रयत्न प्रेरितो वायुर्यदोर्ध्वभागे प्रतिहतो ऽचं व्यंजयति तदा स उदा
त्त इति भावः। अजिति। उकार इत्सतस्तदनुवर्तते। उदात्तत्वादीनामज्धर्मतायाः एव लोकप्रसिद्ध
त्वेनह ल्स्वर प्राप्तौ व्यंजनस्याविद्यमानत्वाच्चेदं स्वरूपकथनपरं बोध्यम्॥ आये इति। पञ्चम्यर्थः कि
बोंत इत्यं तो दात्त ः" जस्य स्यादनुदात्तः। एकादेशउदात्तेनोदात्तइत्येकारउदात्तः। अर्वाङित्यभिमु
खवाच्यत्वेनु स्यान्त्वं किंवो त इत्संतो दात्तम्॥ आद्यस्य शेषनिघातेनानुदात्तत्वं अवंतमंचतीत्यर्थे क्
दुत्तरपद प्रकृतिस्वरेणवांदो दात्तत्वम्। एकस्मिंन च्चानुदात्तानुदात्तयोर्धर्मिणो मेलन विरोधाद्दा
ह। वर्णधर्मो विति। बाहुलकादधिकरणे घञ्। अंशो आद्यजित्सन्ध्ये इयं त्रिस्त्री स्यपष्ठाथो लोक
१२ वेदयोरुदात्तादिव्यवहारस्य प्रसिद्धत्वात्। ह्रस्वग्रहणमिति॥ ह्रस्वपदस्य इति ग्रहणमित्यर्थः। अ
तंत्रमिति॥ स्वशास्त्रसंकेतितरूपेणाबोधकमित्यर्थः। किंत्वर्द्धमात्रारूपार्थबोधकमिति भावः राम
एवं च दीर्घादिष्वप्यर्धमात्रे वोदात्ताइत आरम्भनवसख्या अ अइसतः प्रागुक्तपर्वेणास्यात्रिपा १०
प्रर्वेणात्रिमघोन [illegible] न्नीमां द्वांद संहृयन मनवन्धोर्विधानाच्च [illegible]
[illegible] वहुल [illegible] मान

द्यामपिप्र इति ः सर्वं चेदं भाष्ये स्पष्टम् ॥ अर्द्धमुदात्तमिति । इति तु स स्या स स्व भामे ति व त्व्या ख्येया । उत्तरार्द्धमित्यस्य चा
र्द्धमात्रा तो व शिष्ट उत्तरो भाग इत्यर्थः । वेदे तु यथा प्रयोगं प्रातिशा [illegible] ख्या दस्माच्च व्यवस्था । तस्य चेति । अनु
दात्तस्येत्यर्थः । उदात्तेति । उदात्तस्वरितयोः परत्वे सतीत्यर्थः । तयोः परत्वं चोपस्थितानु दात्तापेक्षयैव ॥
अन्यत्र । उदात्तस्वरितयोः परत्वाभावे । प्रातिशाख्ये इति ॥ लोके तु अनुदात्त एवेति भावः । ह्रस्वस्वरितमुदाहरति
केति । किमो दिसत् क्वातीति क्वादेशे तित्स्वरितमिति स्वरितः । दीर्घं तमुदाहरति । रथानामिति । ये रा इ ति स्व
दृ दृ रितो वानुवृत्तेपदे विसेकारः स्वरितः नोदात्तस्वरितोदयमिति निषेधस्तूदात्तादनुदात्तस्वरितं इत्येवानं तरस्ये स्य स्ये
ति न्यायात् । स्वरितपरमुदाहरति । शतचक्रमिति । अहेरित्यर्थः । अह्वेः वृत्रस्येत्यर्थः । छे इ सि वा वचनं प्रा इ लो
य अ उ पथा या इति वचनात् गुणाभावः । उदात्तस्वरितयोरिति स्वरितः । उदात्तयणो ह ल्पूर्वादिति तु न छान्द
सत्वात् । यच्छब्दः फिषन्तः सं तो दात्त ज दे का देश स्त्र वा स्वरितः । स इति । उदात्तादि ह्रस्वादि संज्ञक इत्यर्थः ।
मुखनासिका । उच्यते सो वचनः । बाहुलकात् कर्मणि ल्युट् । मुखसहिता नासिकेति विग्रहः । तया व
चन इति साधनं कृतेति समास स्तत्र शाह ॥ मुखसहितेत्यादि । मुखेति किं यमानुस्वाराणामेव प्रसज्येत ए
वं चाङ्गो तु नासिक इत्यत्रानुस्वारः स्यात् । नासिकेति किं । शक इ सादा वनुदात्तोपदेशेत्यादिना कलोपो

ल·श·शे· मात्रत्वं। अष्टादशेति। यद्यपीदं न व्यक्तिपक्षे व्यक्तीनामानन्त्यात्। तथाप्यष्टादशधर्मैव त्वमकारजातीयादे
११ रित्यर्थः। ह्रस्वत्वादीनां तत्तत्समानाधिकरणोदात्तत्वानुनासिकत्वादीनां च भेदमाश्रित्येदं बोध्यं। एवमग्रे
पि। लृवर्णस्येति। विवृतस्येत्यर्थः। तेन लृति लृ वेति विधेयस्येषत्स्पृष्टस्य दीर्घत्वेपि न क्षतिः। दीर्घाभा
वादिति। अत एव तुल्यास्यसूत्रे भाष्ये लृति सवर्णे ऋ सनेन पक्षे द्विलकाराभावेऽकं सवर्णे इति दीर्घ
त्वेहो लृकार इति ऋकारघटितप्रयोगः संगच्छते। ह्रस्वाभावादिति। इदमेओङ्सूत्रादौ भाष्ये स्पष्टं।।
गा नरोदनादौ च तु[redacted]मात्रादीनामुपलंभेपि शास्त्रीयकार्येऽनुपयोगाभावाल्लोके प्रयोगेष्व
प्रयोगाच्चेनोक्ताः। अत एवानुदात्ततरस्यानुक्तिः। एकश्रुतेः स्वरांतरत्वेऽइदमुपलक्षणं तस्याः स्तो
केपि सत्त्वात्। तुल्यास्य। तुल्यावास्यप्रयत्नौ यस्येत्यर्थः। आस्ये भव मास्यं व्याख्यानात्। तच्चवर्णोप
योगित्वात्स्थानमेव। प्रयत्नस्य पृथगुपादानात्। प्रकृष्टो यत्न आभ्यंतरः तस्य वर्णोत्पत्तिव्यवहि
तप्राग्भावित्वस्य प्रकर्षत्वात्। तेन कलं च षष्ठ्यर्थस्य [redacted] तत्कार्यगतमेदं स्थानेष्वारोप्य मेदघ राम
टितं तुल्यत्वस्य निर्वाहः स्पष्टं चेदं भाष्ये तदाह। ताल्वादीति। शिक्षायां कंठादीनां कंठत्वादिमेवस्था ११

नत्वोत्पात तद्रूपेलो वास्य शब्दे न ग्रहणमिति तन्मात्रगभेदमादाय नोदात्तादिकृसावर्ण्यं भंग इति बोध्यम्।
यस्य तद्रूपं येन यदीये नैत द्वये न तुल्यमित्यर्थः। यत्तु भाष्ये केवलमिति निर्देशाद्यावदास्यभवं तुल्यत्वं ग्राह्यं।।
अत एव चीः सावर्ण्यमाशंक्य नैतौ तुल्यस्थानाविति भाष्ये समाहितम्। अत एव वलयोर्न सावर्ण्यं तेन त
ह्वानां सामित्यादौ तोर्लीति न। अत एव प्रयत्न शब्दे न यत्न मात्र ग्रहणमिति पक्षे [redacted] यत्किंचि
त्प्रयत्नैक्यमादाय सवर्णसंज्ञेत्यर्थो ऋ रो ऋ रि सवर्णेऽ इति सवर्णग्रहणेन ज्ञापकेन साधितो भाष्ये तेन
स्थानांशे या वक्ष्यमाण साम्ये ऽस्ति वक्ष्यमाण संकीर्ण इति प्रतीयते।। न च यावदास्यभवतुल्यत्व विवक्षणेन प्र
यत्नग्रहणं व्यर्थं प्रयत्नस्याप्यास्यभवत्वादिति वाच्यम्। ह्रस्वदीर्घयोः सावर्ण्यानापत्तेः तयोर्जेन
कालमास्यभवानां वायुसंयोगानामतुल्यत्वात्। तस्मादास्यभवानां कंठादीनामेव ग्रहणमिति बो
धनाय तत्सार्थक्यात्।। आस्येति किं तत्त्यातृ ऋ रो ऋ रीति लोपो माभूत्। प्रयत्नेति किं। वाक् श्च्योतति।
प्रेतिकिं। शषयोः स्थाना[redacted]घोषविवारस्य बाह्य प्रयत्नसाम्येन तत्रैव दोषात्। कस्य किं स्थानमित्या
शंकायामाह। अकुहेति। यद्यपि सर्ववर्णोच्चारणे कंठव्यापार आवश्यकस्तथापि चकाराद्युच्चार
णे तालुव्यादिव्यापारोपि तथाऽकारादीनामुच्चारणेनेति भावः। कचयोस्तु न सावर्ण्यं। यावत्स्थानसाम्या

ल·शा·शे· भावात्। भिन्नस्थानकथनं चैवमुपपत्तेश्च। अत्र कं ख पदं कंठस्थानं तत्समीपजिह्वामूलस्थानो ऽयमपप
१२ रं। तेन केष्वाव हो जिह्वामूले तु कुः प्रोक्त इति शिक्षया न विरोधः। जिह्वामूलीयपदस्य चवर्णविशेषे
रूढिरिति न व्यवहारातिप्रसंगः। अत एवायोगवाहेषु जिह्वामूलीयगणनं भाष्ये। तत्र वर्णोऽस[illegible]त्तेः प्रा
कृतत्तत्स्थानादौ जिह्वास्पर्शाद्यनुभवेन तत्तद्वर्णानां तत्स्थानत्वनिर्णयेऽप्यकुहसादिकथनं साधार
ण धर्मबोधनायानुवादकं। न त्वेतदेव कं खादिस्थानविधायकमिति भ्रमितव्यं। विसर्जनीयपदेनात्र सा
ह्च यद्वकाराश्रयस्य तस्य ग्रहणम् अत एवायोगवाहा विशेष्याश्रयस्थानभागिन इति शिक्षया
न विरोधः। दंताद् इति। दंतसंयुक्तदेशाद् इत्यर्थः। अतो ऽन्यदंतस्याप्युच्चारणं भवत्येव। उपध्मायध्मा
येते ने न तत्र भवत इति योगेनोपध्मानीयस्योष्ठत्वमित्याहाउपूपेति। रूढत्वाच्च न व्यवहारातिप्रसंगः
। नासिका चेति। येन स्वस्ववर्णानुकूलं [illegible] ताल्वादिगृह्यते।। अत एवैषां प्रातिशाख्ये नासिकायां भवद्
स्पर्शकनासिकाशब्देन व्यवहारः। यत्त्वनुस्वारयमानां च नासिकास्थानमिष्यत इति शिक्षोक्तेरेषां ना
सिक्यकरणं। किंच स्थानत्वे कउ यो सावर्ण्यापत्तिः। यावत्स्थाने क्याभावात्। यत्किंचित्स्थानैक्ये न राम
तत्त्वे नुस्वारमामपि परस्परं सावर्ण्यापत्तिरिति। तन्न। कंठादीनामपि करणत्वस्यैवास्पष्टत्वेन यर्णानि १२

ति भाष्यात्प्रतीतेः स्थानत्वव्यवहारस्तु वर्णाभिव्यक्तिजनकत्तात्वादौ वर्णजनकवायुसंयोगाधारे वर्णा
धारत्वारोपेण तत्तत्स्थाने जिह्वाग्रादिसंबंधेन वर्णोत्पत्तिस्ताजिह्वाग्रादौ तत्संबंधजनकप्रयत्नविशेषे स्प
ष्टतादौ च करणत्वव्यवहारः वर्णाभिव्यक्त्यनंतरभावी सावर्ण्यानुपयुक्त आंतरतम्यपरीक्षोपयुक्तस्त्वकं
ठविवरादिनिष्ठविकासादेरास्यबहिर्देशावच्छिन्नकार्यस्य जनको यत्नो गुणशब्देनोच्यते। [redacted] अकारादिनिष्ठा
नुनासिक्यस्य भेदकत्वाद्गुणस्य सादौ गुणत्वेन व्यवहारस्तु कंठाद्यवच्छिन्नवायुसंयोगे नोत्पन्ने मुखनासा
वच्छिन्नवायुसंयोगेन तद्रूपधर्मोत्पत्तेः। एवं च नासिकायास्तत्र गुणजनकत्वादनुनासिककारादीनां ना
सिकास्थानं नोक्तं मूले। एकीयमात्रादकं नाम तस्य गुणभेदादन्यत्वं भवति अन्यदिदं शीतमन्यदिदं
मुष्णमिति दृष्टांतपरभाष्येण तथैव प्रतीतेः अस्मान्न द्रव्यम्। उदात्तत्वादीनीं गुणत्वव्यवहारस्तु साव
र्ण्यानुपयुक्तत्वां तरतम्यपरीक्षोपयोगित्वस्य सादृश्येनेति बोध्यं। ङञादीनां तु तद्गुणरहितस्वरूपानुप
लंभेनोभयावच्छेदेन वायुसंयोगात्तरमेवस्वरूपोत्पत्ताविनिगमनाविरहेणोभयोः स्थानत्वं अनुस्वार
यमानां चेति शिक्षायां चेन ङञादीनामपि संग्रह इति युक्तमत एवकं व्योकार इत्सा [redacted] द्युक्ता ना

ल·शौ·शे०
१२
13

सिक्यान्नासिक्यय मानुस्वारानि तिस्थानानीत्युक्तं प्रातिशाख्ये। नासिक्याऽऽजणनमा इतितद्व्या
ख्याता ङकङ योः सावर्ण्यं तु मवसेव। आस्यैतुल्यदेश प्रयत्नमिति वार्त्तिके किमास्योपादानेप्रयोजन
मिति प्रश्ने प्रयत्नविशेषणमास्योपादानमित्युक्ता तद्व्यावर्त्तलेन बाह्य प्रयत्नान्प्रदर्श्य यथा त्वती
यास्तथा पंचमाआनुना[redacted] सिक्यमेषामधिकोगुण इति भाष्येणतस्य बाह्य प्रयत्नत्वोक्त्यात्र सत्रे
नासिकाया आस्यशब्दे न तत्र स्वप्रयत्नस्यच प्रयत्नशब्देनाग्रहणबोधनात् नासिका आस्य बाह्येति
वदतां मते तद्ग्रहणाभावाद्यंआनए व बाह्यप्रयत्नानुपक्रम्यामेनुनासिकानन्तोनादिनोहरूशः स्प
ताः इति षन्नादायतान्वेवम्या सिनस्तुत्ववफादयः इत्यष्ट्रौ सांख्ये रोविद्यादित्युक्तं शिक्षायां। नादे
ति संवारस्थो ष योरूपलक्षणम्।। श्वासेतिविवाराघोषयोः नन्दाविलुपलक्षणं एवं सर्वस्य लु
तल्लकारस्य च अनुनासिकस्यादर्शनादिसलम्।। एदैतोरिसादि। लोकानुवसिद्धार्थानुवादकेत्र ४५
तपरशास्त्राप्रवृत्ता सुतानामपितद्व्या नलंबोधम्। तथाच पाणिनीयशिक्षा। कंठ्याव हाविचु
यशास्तालु व्याओ षजावुपूंस्युमूर्धन्या[redacted] ऋटरषाद त्पाल्तुलसाः स्मृताः जिव्हामूलेतु कुः राम
प्रोक्तोदंत्यो ष्ट्यो वः स्मृतोबुधैः एऐ तु कंठ्यतालव्या वोऔ कंठोष्ठऔ स्मृतौ। अष्टौ स्थानानि वर्णा १२

नासुरः कंठः शिरस्तथा जिह्वामूलं च दंताश्च नासिकोष्ठौ च तालु च। हकारं पंचमैर्युक्तमंतस्थाभिश्च संयु
तम्। उरस्यं तं विजानीयात् कंठ्यमाहुरसंयुतमिति॥ यत्तु दंतोष्ठादिसमुदितं स्थानमिति। तन्न। शिक्षा
यां दंतोष्ठ्यं कंठ्यतालव्याविति दोषतत्र मवद्रूपाधिकारविहितयतः प्रत्येकमनुपपत्तेः। दंतोष्ठ्यमि
त्यादित्वसंगतमेव। स्वांगसमुदायस्य स्वांगत्वाभावाच्छरीरावयवसमुदायस्य शरीरावयवत्वाभावात्।
एतेन दंतोष्ठरूपमतिरिक्तं स्थानमित्यपास्तम्। ओष्ठौ स्थानानीति प्रतिज्ञा विरोधाच्चेति दिक्। सू
त्रे प्रशब्देन विल क्षणार्थबोधेपि लोके यत्नप्रयत्नयोः पर्यायतेति ध्वनयन्नाह। प्रयत्नो द्विधेति।
केचिद्यत्नद्वयमेव पाठः। चतुर्धेति। यत्तु स्वराणामूष्मणां चैव विवृतं करणं स्मृतं। तेभ्योपि विवृ
तावेङौ ताभ्यामैचौ तथैव चेति शिक्षावाक्याद्विवृततरविवृततमयोः प्रतीतानाचकलाविति सू
त्रभाष्याद्दूष्मणामीषद्विवृतत्वस्य प्रतीतेः साचतुर्धेत्यसंगतमिति॥ तन्न॥ नाज्झलाविति सूत्रेणाविवृ सू ८
तत्वव्याप्तेनामेषां सवर्णसंज्ञानुपयुक्तत्वबोधनमित्याशयात्॥ भाष्यमते तु संवृतसप्तप्रयत्नाः॥
एवं चैदेतोरोदौतोश्च नसावर्ण्यप्रसक्तिः। प्रयत्नभेदादितिबोध्यम्॥ नाज्झलाविति सूत्रमपि सू २
प्रयत्नभेदप्राप्तसावर्ण्याभावानुवादकं सत्तत्स्येवबोधकमतएव भाष्ये तन्न वक्तव्यमितिनोक्तम्॥

ल॰घा॰प्रो॰ स्पृष्टादीनामाभ्यंतरत्वंवोछ्यप्रभृति काकलकपर्यंतस्थानगतत्तत्स्थानेषुजिह्वाग्रादीनांस्पर्शे
१४ बत्स्पृशद्दूरावस्थानसमीपावस्थान[redacted]रूपाभ्यंतरकार्यकारित्वाद्वर्णोत्पत्तयवहितप्रागभावि
15 त्वाच्चेतिबोध्यम्। तत्रबहूनामेकस्थानत्वेपिकस्यचिदुच्चारणेसम्यक्स्पर्शः कस्यचिदीषदितिशिक्षाका
रोक्तिमनुभवंचानुसृत्यविवेक्तव्यम्॥ प्रयत्नमिति॥ नपुंसकेभावेल्युट्। प्रयत्नमितिपाठः। नड्। तस्य
पुंस्त्वात्॥ तथाचशिक्षा। स्वराणामूष्मणांचैवासनं तरं अचोस्पृष्टा यणस्त्वीषन्नेमस्पृष्टाःशलः
स्मृताः। शेषाःस्पृष्टाहलःप्रोक्ताइति। अचोस्पृष्टाः। स्पर्शाभावरूपविवृतत्ववंतः। यणस्त्वीष
दित्यनेनतेषामीषत्स्पृष्टत्वमीषद्विवृतत्वंचबोधितम्। नेमस्पृष्टा इत्यनेनशलामीषद्विवृततरीयणा
पेक्षयाधिकविवृतत्वंचेतिबोध्यम्॥ अत्रशिक्षोक्तव्याप्यधर्मवत्तांव्यापकधर्ममादायनसावर्ण्य
मिति यणांचवर्गादिभिर्नसावर्ण्यं। तेनांचितदुत्वादीनयाद्रिपरसवर्णः। विवृतमेवेति। प्रक्रि
यादशायांविवृतत्वंप्रतिज्ञेयमित्यर्थः। तेनदंडाढकादौदीर्घसिद्धिः। अन्यथासंवृतस्यह्रस्वाका
रस्यविवृतेनदीर्घेणसावर्ण्याभावात्तन्नस्यादितिभावः। दीर्घाकारस्यविवृततरत्वंतुपाणिनिशि राम
क्षानुक्तत्वान्नेतत्छास्त्रप्रक्रियोपयोगीतिदिक्। तस्यप्रयोगेसंवृतत्वेमाननमाह। अ अ इत्यपले १४

मेदाद्दीर्घाभावः।अत्रोद्देश्यसवर्णग्रहणं जातिनिर्देशो वानर्थक्यान्नापानात्॥अधिकारत्वे फलमाह। तेनदीर्घाक्षरस्यनाम
त्रिपाद्यामपीति॥अन्यथागोधुङ्मानित्यत्र ढत्वस्य हत्वानुनासिकेपुमश्भावनापत्तिरितिभावः॥ मादेशप्रवृत्तिभावः।१
वस्तुतो घत्वे कृते झय इति वलापत्तिर्दोषः।नचततः परत्वात्ग्रहत्वानुनासिकयोस्तद्व्याप्तिरिति
वाच्यम्॥विप्रतिषेधे परमिस्तस्याप यथोद्देशत्वेन त्रिपाद्यामप्रवृत्तेः।पूर्वत्रासिद्धेनास्ति विप्रतिषे
धो भावादुत्तरस्येत्यनेन तस्याप्यथोद्देशत्वस्यैव बोधनात्॥अन्यथापरस्यासिद्धत्वे पि विप्रति
षेधस्त्वत्रस्य सिद्धत्वात्परिभाषाणामि वास्यापि कार्यकालपक्षे तेनाकर्षणोपपत्तेरत एव भाष्ये
वलमेवापादितं।अधिकारत्वादेव प्रभुत्वं धुरिसिद्धं वाच्यमित्यादिचरितार्थं।एवं चयत्रानुवृत्ति
त्वं स्तस्यासिद्धत्वम्।पूर्वत्वबक्क चित्सपादसप्ताध्यायाः क्वचित्सत्रांतरसहितापाः तत्रायमर्थः
होढ इत्यादावुस्योपस्थितो वाक्यभेदेनान्वयः।हस्य ढो भवतिइदं च शास्त्रं पूर्वत्रासिद्धमित्यत ए
३३ व नमुनेत्यादिभिस्तन्निषेध उपपद्यते।पूर्वत्रेति संग्राहकमेवाशं ग्राहिकयेव तु तत्तच्छास्त्रं
प्रति तस्यासिद्धत्वं प्रतिपाद्यते।तेनापवादस्य यं प्रसस्यपवादत्वं तत्रासिद्धत्वाभावेप्यन्यत्रासिद्धत्वं
भवत्येवाजसिद्धमिति।सिद्धं निष्पन्नं प्रवृत्तं सिद्धमप्रसमयविधाविसादौ तथादर्शनात्।तद्धि

स॰रा॰टी॰ न्नमसिद्धमनिष्पन्नमप्रवृत्तम्। यद्यपि लोकेनाहार्य ज्ञानस्यैव प्रवर्त्तकत्वं दृष्टम्। तथापीह शास्त्रप्रामा
ण्यादाहार्यारोपोऽपि शास्त्रप्रवृत्तावप्रवृत्तौ च नियामक इति बोध्यम्॥ अत्र कार्यासिद्धत्वे अन्यत् साधयति
१५ स॰२ 15 द्विः॥ अद् ज ओ इति स्थिते परत्वान्नुले तस्यैपाद सप्ताध्यायीस्थ कार्ये दृष्ट्या ऽसिद्धत्वेऽपि देवदत्तहंतृहन्त
न्यायेनाकाराभावेन पररूपत्वाद्यनापत्तिः। अतिदेशस्यारोपरूपत्वान्निरपेक्षानारोपात् भवेन कार्यप्र
वृत्तेरत्र पक्षे आवश्यकत्वात्। शास्त्रासिद्धत्वे तु यत्राप्यंतरंगत्वात्त्रैपादिकं प्रवृत्तं तत्रापि तत्कृत्ये [illegible]
वाभावारोपेण तन्निवृत्तिबुद्धेरभाव आदेशबुध्य भावोल्लक्ष्य [illegible] जायमानं कार्यत्वादे
शएवस्यानिबुध्याप्रवर्त्तते न हि रजतभ्रमप्रयुक्ता प्रवृत्तिः शुक्तिं न गोचरयतीति न दोषः। यत्र तु सह
सेपा५ प्रसंगस्तत्राप्रवृत्तिरेवाभावात्॥ न च पूर्वत्रिपादीस्थ [illegible] मस्तीति वाच्यम्। पूर्वशास्त्रप्राप्तो निषेध
इत्यर्थेन लोपः सुपि इति सूत्रासंगतेः। तद्धि नियमार्थं। [illegible] इत्यस्य दृशायां कस्यापि
पूर्वशास्त्रस्याप्राप्त्यात निषेधाप्रवृत्तौ नलोपे जाते भुक्तवं तन्न्यायेनेतदप्रवृत्तौ राजाश्वे दीर्घसिद्धा
निपमानुपयोगात्॥ राजभ्यामित्यादावपि दीर्घोपपत्तेश्च। पूर्वशास्त्रविषयसंभावनायामि राम
त्यर्थे राजभ्यामित्यादौ नलोपे सुब्विधि दीर्घविषयसंभावनया सर्वथा न लोपानापत्तेरिति दिक्॥ वा १५

त्यप्रयत्न इति ।। काकलकाधस्तान्ज लविवरसं [redacted] कोचविकासप्रवासोत्पत्तिध्वनिविशेषरूप
घोषास्वघोषप्राणा ल्पत्वमहत्वरूपकार्यकरत्वमेषां ।।१२।। तथा हि ।। आत्मबुध्यासमेत्यार्थान्मनो युं
क्ते विवक्षया ।। मनः कायाग्निमाहंति सप्रेरयति मारुतं ।। सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः व मू ३
र्णान् जनयते इति शिक्षयामुक्तं । आत्मांतःकरणीसंस्काररूपेण स्वगतानर्थान्बुध्यास्व कृत्वा
समेसेकबुद्धिविषयान्कृत्वा तद्बोधनेच्छया मनः सुक्तं करोति । तदिच्छावन्मनः कायाग्निं जाठर
मग्निमभि हंति । सकायाग्निः सोदीर्णः सम्मारुतः उदीर्णः ऊर्ध्वप्रेरित इत्यादिस्तदर्थः । एवं च शाब्द
प्रयोगेच्छया सञ्चलाभिहताग्निनानाभिप्रदेशात्प्रेरितो वायुर्वेगान्मूर्द्धपर्यंतं गत्वा प्रतिनिवृत्तो
वक्त्रं प्राप्य उक्तप्रयत्नसहायेन तत्तत्स्थाने षु जिह्वाग्रादिस्पर्शपूर्वकं तत्तत्स्थानाभिघातका
प्रयत्नास्ते आस्यांतर्गततत्तत्कार्यकारित्वादाभ्यंतरा इत्युच्यंते । गलविवरविकासादिकरा प्रयत्नास्तु
बहिर्भूतदेशकार्यकरत्वाद्बाह्या इति । मात्राकालिकत्वादिरूप ह्रस्वत्वादिकं तु वायवल्पत्वमह
तर हत्वहतमित्ति नाभिप्रदेशात्प्रेरकप्रयत्न एव कश्चिद्विलक्षणोल्पं वायुं प्रेरयति कश्चिदधिकमिति त
स्य वायुप्रेरणात्मकं कार्यमास्य बाह्यदेशमिति तदपि वाह्ययत्नेवात एव वाइउगेस्तत्रेमा प्येव्ह
५ न्याहसवर्णानभिव्यनक्ति ततोयत्न विवृ षेत्तात जविवरविकासादीन् करोतीति तत्रप्रेतसस्पानाः ५

स्प॰

स॰ श॰ षां स्वत्वादिजनकप्रयत्नस्यौविशेषत्वेनसवर्णसूत्रेग्रहणमित्युक्तं। यद्यप्येकएवयत्नःसर्वकार्यजनको
१६ वर्णोनाशकश्चेतिपरःसन्निकर्षसूत्रेभाष्येउक्तं। तथापितत्तत्कार्यजनकोपाधिनाएकस्मिन्नपिभेदमा
तथा इ रोप्यतथाव्यवहारइतिबोध्यम्॥ उदात्तादिजनकयत्नस्याभ्यंतरकार्येकरत्वेपिउदात्तादिशब्दै
16 र्विनाबोधितानांतेषामनुदात्तइत्यत्रेनाविवक्षाबोधनात्सवर्णसंज्ञानुपयुक्तत्वात्तेरतस्यपरी
क्षोपयुक्तत्वस्यप्रसादृश्येनवाह्येषुगणनं। इदंह्रस्वत्वादेरा[redacted]नुनासिकस्यचोपलक्षणं। शरइति।
शषसाः अनुप्रदानंबाह्यप्रयत्नः। विवृतत्वेतइति। तदभिव्यक्त्युत्तरं[redacted]जायमानेकंठविवर
विकासेतेषांकंठेतत्स विवक्षाबोध्या॥ विवारएषांप्रयत्नइतिभावः। अन्येत्विति। वर्गतृतीयचतु
र्थपंचमास्त्रयमौकारानुस्वारौयरलवाइत्यर्थः। नादभागिनस्तत्प्रयत्नकाः यद्यपिखयादिषुघोषा
[redacted]घोषान्यतरप्रयत्नमात्रेणापिनक्रियांशनिर्वाहस्तथापिशिक्षानुरोधेनाभेषायुक्तिः अल्पासवोल्पप्रा
णाः यतएतदुच्चारणोत्तरंप्राणानामल्पत्वमिवभवति। वर्णेष्वितिविद्यमानौमितिशेषः। चतुर्णामितिनिर्धा ना
रणेषष्ठी अन्यतमादितिशेषः। पूर्वसदृशाइतिसादृश्यंप्रयत्नकृतं। अतएवायोगवाहेषुयमानांगणनंभा राम
ष्येचत्वारोयमाःस्मृताइतिपाणिनिशिक्षाचसंगच्छते। अयंचवेदेएवतदाह। प्रातिशाख्यइति। अन्ये २५

वर्णास्त्रिय... तोवर्णानामपि... विसर्गः = ६

पं२

ष्यामिति। अचामुक्तान्यहलां चेत्यर्थः। परत्वादाख्येति चेन्नाचामपि ग्रहणं। सुँपां सुलुगिति सूत्रे ईकारस्पीतत्वे घोषसंवारनादा
तोदकार इति भाष्यात्। घोषसंवारनादाल्पप्राणान्महचां। अन्यथान्तःस्थपर्याये णस्याताम् अल्पप्राणत्वानंगी नंगीकारे = २
कारेद्धोपर्याये णस्याताम्। अचां घोषसंवारः संनिकर्ष इति सूत्रे भाष्ये विस्पष्टं अल्पे इति। द्वितीयचतुर्थौ
तद्यमोशषसहा अयोगवाहाश्चेत्यर्थः। जिह्वामूलीययमादीनां स्थानबाह्यप्रयत्नकथनं तु स्वरूपनिर्णा
यायन तु सावर्ण्यां तरतम्यपरीक्षादावुपयोगीति बोध्यं। अनुपयुक्ता इति तु व्याख्यासूत्रे प्रशब्दग्रहणात्।
उपयुक्तत्वे हि शखयोरपि सावर्ण्यं स्यादिति भावः। आंतरतम्यपरीक्षा च घोषवत इत्यादिना तत्र तत्र स्फु
टी भविष्यति। स्पर्शाः तत्सद्व्यवहाराय। अंतःस्था शब्दा आदंतःस्पर्शोष्मणोः तस्मिन्नेव तिष्ठंतीति तदर्थः।
उष्माण इति। ऊष्मा वायुस्तत्प्रधाना इत्यर्थः। एवं सोष्माण इत्यस्य वायुना सह वर्तत इत्यर्थ इति प्रातिशा
ख्यभाष्ये स्पष्टं। यद्यपि वर्गद्वितीयचतुर्थयोरपि स्यादेवं तरतमसूत्रभाष्यादूष्मत्वं तथापि विवृतत्वमूष्म
णामित्सूत्रे तथा वक्ष्यंते। अन्यथा कखादीनां सावर्ण्यापत्तौ नाज्झलाविति सोदितिनिर्देशासंगतिरिति भा
वः। अचः स्वरा इति। उदात्तादिभिः स्वयमेव राजंत इति व्युत्पत्तेः। तद्धर्मत्वादुदात्तादयोऽपि स्वरा इत्युच्यंते।
कपाभ्यामिति। खफयोरप्युपलक्षणं। अं अ इत्युपलक्षणमिकारादेरपि तदाहाचः परावितिः। ऋलृ
वर्णयोरिति। आ च लृ च वा इत्यक्षति विग्रहः। ऋत्यक इति प्रकृतिभावः। [redacted] एतदर्थमेव वर्णोपदेशे लृकार

हल्ग्रहणं प्रत्याहारघटकेषु ::२ वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते तद्वदसुकेरिति भावः ::२

ल०घ०प्रो० पाठः॥ अन्यथा तस्यासवर्णशंकयास्य वचनस्यैवाशक्यत्वं स्यात् । ध्वनितं चेदमेओङ्‌इति सूत्रशेषे भाष्ये । तत्र हि सवर्ण्येते सावे
हलोनन्तराः इति सूत्रे प्रत्याहारघटकेष्वपि ग्रहणकशास्त्रप्रवृत्तौ मात्राकालस्य य[...]या देरणुदित्सूत्रेण यादि
१७ संयोगेष्ठु ::३ ग्रहणेन ग्रहणात् द्विर्व्यंजनाश्रयो विधिर्न प्राप्नोतीति शांक्यमात्रिकव्यंजनानुपदेशादनुपादेयत्वात्सत्वात्
असत्प्रतिपत्तेरशक्यत्वान्न अणुदित्सूत्रेण तद्ग्रहणमित्युक्तं । न च क्लृप्तशि[...]वेशादायन्तत इति निषेधात्
प्लुतानापत्तिः ऋलृवर्णयोः पृथगनेकं घटककरणेन क्वचित्सरस्यग्राहकत्वक[...]स्यानेनादोषात् । अका
रहकारयोरिति एकारस्य तालव्यत्वमोकारस्यौष्ठ्यत्वमिति मते एकारशाकारादीनामुपलक्षणमिदं ।
एतेन नाकृशालाविह्वेव सूत्रयितुमुचितमित्यपास्तं । हस्विचेसेव सिद्धे तोषो रिसाकारे व्याहरसर्थ । सूत्रेवि
वचनोपपत्तये मध्यमपदलोपिसमासं दर्शयति । आकारसहित इति । अत एव वेलाविति निर्देश उपप
द्यते समाहारद्वंद्वे तु हस्वसंयोगोऽस्त्येति समाहारद्वंद्वं कृत्वा आपदेन द्वंद्वे तु अजभिरप्याकारस्य सावर्ण्यं
नस्यादिति भावः । अत एव भाष्ये प्रयत्नभेदेनैषां सावर्ण्याभावः साधितः । एतेषु परेष्विति । इदमुपलक्ष
णं एतेषु विद्यमानस्येत्यपि बोध्यं । तेन हकारादीनां मकारादिषु परतो दीर्घादिसंग्रहः । अच्त्वं स्यादिति ।
अच्त्वं द्बाध्यत्वं स्यादित्यर्थः । इदं प्रत्याहारघटकेष्वपि ग्राहकशास्त्रप्रवृत्तिरिति मते यक्तिपक्षे च बोध्यं । राम
अणुदि । अणुदित्सवर्णबोधकता अत्र विधीयते सवर्णस्येत्यस्य बोधैरिति शेषः । आदेशादौ सवर्णे १७

द९

ग्रहणवारणायाह० प्रतीयत इति परे तु अप्रत्ययग्रहणमेकदेशानुमत्या भाष्यमाने न सवर्णानां ग्रहणमिति
५२ परिभाषां ज्ञापयतीति पुक्तं प्रत्ययं दस्य तदर्थत्वं तु न युक्तं वार्त्तिककृता टित्कित्मित्त्व[illegible]योगोक्तेः भाष्य
कृता चाप्रत्ययग्रहणमेतत्परिभाषाज्ञापकमित्युक्तेः ऽस्मादादीयस इति सूत्रे भाष्ये युनि न मिते । तत्र हि किम
मर्थमादित्सुच्य ... तेआद इत्से वो ध्यता काकूपसिद्धिः आंतर्यतो दीर्घस्य दीर्घो भविष्यति एवं तर्हीमे ... वक्ता ८४
पयति भवत्येषा परिभाषा भाष्यमानेन सादित्वमुक्तं व्याख्याने हि पूर्वपक्षसिद्धांतयोरुभयोरपि निर्दिष्टज्ञाप
त्तिः जातिपक्षे प्यनयैव परिभाषया सवर्णग्रहणं वारणीयं० व्यक्तिपक्षे गुणभेदकत्वप्राप्तं च वारणीयं तेन घट
वदित्यादौ नानुनासिको वकारः एतेनाणुदित्सूत्रं च सिद्धं ऽणग्रहणेनाणस्तु गुणभेदकत्वं ज्ञाप्यत इति परास्त
मित्याहुः । नन्वचारित्वादावनुवादे कथमुदित्वमिति चेन्न व्याकरणांतरे षामुदित्संज्ञकत्वेनाद्दोषात् उपदे ८८
शाश्वदस्य करणसाधनत्वेन शास्त्रपरत्वे ऽस्यापि शास्त्रत्वेनेत्वप्रवृत्तेः सुलभत्वाच्च । चो भिन्नक्रम इत्याह
अत्रे सवर्णेऽणग्रह्यो मेयरः = ४ दिश्चेति । यद्यपि समुदायसवर्णिनो ऽप्रसिद्धास्तथापि तदवयवानां चादिसवर्णा एवात्र तत्स[illegible]वर्णबोध्याः ह्रस्वाका
राद्योरपि काललघुरुषाद्युपाधिभेदेन स्थानेषु भेदमारोप्य तुल्यास्याप्रयत्नं स्पष्टं । अत्रेति ग्राह्यकसूत्र एवेत्यर्थः[illegible]
व्याख्यानादिति भावः । उपसर्गादृतीत्यादितपरकरणाद्धिति तु न युक्तं लकारग्रहणेन चारितार्थ्यात् । एवमिण
पि परे लो वा । अविद्धिरिति सूत्रे रूप इत्येव सिद्धे ध्वोरिति गुरुनिर्देशाद्व्याख्यानाच्चेति लण सूत्रे भाष्ये स्पष्टं । नन्वे

अणग्रहणं नन्विति समभिप्रेत्य सूत्रभिन्नं । सूत्रमते ऽणग्रहणाभावात् । वार्तिकमते ऽणग्रहणाभावेन ज्ञापकाभावात्

सौ॰शे॰ल॰ कस्य ह्रस्वाविसादेः सवर्णग्रहणं न प्राप्नोति अणग्रहणेन वर्णसमाम्नायस्थानामेव ग्रहणेन तत्कारादिचिन्हेन
१८ प्रत्याहारे तत्सवर्णाभिज्ञानेन तत्र सामान्यवर्णोपस्थितेः तदुच्चारितं भेदेन गृहीतेषु तत्र स्पचारितार्थेन व्यक्तिपक्षे
तत्र सात्र सव्यक्तयोर्भेदेन प्रकृते प्रत्याहारघटकद्वितीयवर्णादेरुच्चारितस्यैव ग्रहणं कलादपरं तत्तदिति चेन्न।
जातिपक्षाश्रयणेनादोषात्। अत एवानेकतकारादीनां ऋकारादि सिद्धिः सूत्रेणग्रहणं च न कार्यं। ऋलृ
वर्णयोः सावर्ण्यमिसत्वेन समानजातिलस्यैवातिदेशो नोपसर्गोद्दृत्तीसादेर्न दोषः। एतद्व्यतिरिक्तसवर्ण
समानजातिलसत्त्वात्॥ पृथगनुबंधकरणाच्च न ऋद्धि लृदित्सवर्णयुक्तकार्यसंकरः। व्यक्तिपक्षेऽप्यइउणसूत्र यथा॰
त्रशेषोरूमाध्यरीसात परसूत्रस्य जातिग्रहणप्राप्तसवर्णग्रहणनियामकत्ववदणसूत्रस्य योगवि
भागेन तत्प्राप्तसवर्णग्रहणनिषेधकत्वात् तत् दादीनामङ्गादेर्विधेयेन दोषः सामर्थ्यादिति। एवोयवा
यावदूसाद्देश्यानेंतर तमसूत्रेणैव निर्वाह इति वक्ष्यते। न च भ्यामिस त्रए औ स्वरूपेणपाठ्यो। वृद्धि
रादैजिसूत्रात्प्येद्धि॰ सवपाठ्यं। तत्र गुण सूत्रे च परस्परसवर्णसंज्ञा वादिमते चतुर्णां ग्रहणसत्त्वात् अत्रै
तत्सूत्र वैयर्थ्योपन्यासेन तन्मूलकस्य गुणवृद्धिसंज्ञाविधौ प्रत्याहारद्वयग्रहणवैयर्थ्यस्योक्तत्वाच्चैवए चो
रूगद्यस्यैसूत्रे न तु ग्रहणवैयर्थ्यस्य च संग्रहो बोध्यः। प्रयत्नभेदेनाप्यसावर्ण्यमेतयोः प्रागुक्तं न विस्म राम
र्तव्यं। यद्यपीति। इदं व्यक्तिपक्षे वर्णानामुपदेशस्तावदुपदेशोत्तरकाले संज्ञा तदुत्तरकालमादिरन्त्येनेति १८

एकं गुणभेदेन प्याप्तसवर्णग्रहणनिषेधकत्वमप्यस्य बोध्यं।

[redacted]

अत्नुदित्सूत्रेणभावेतांमहणंबोधनीयं।अन्यथाबाधकसंभावनयातुल्यास्यसूत्रेजशानिग्रहे।प्रामाण्यसंदेहेन४

प्रसाहारस्तदुत्तरकालासवर्णसंज्ञातदुत्तरकालमण्दिदितिएतेनसर्वेणासमुदितेनवाक्येनान्यत्रसवर्णा
नांग्रहणंभवेति।नचात्रेकारःशाकारंग्रहणातीतिनाऊलोविवितिसत्र भाष्योक्तवाक्यापरिसमाप्तिन्यायादिस
र्थः।अयंभावः।आदिरंसेनेतिप्रसाहारसिद्धोनाऊलाविसेतद्वाक्यार्थबोधेसतिनिर्णीतेतद्विषयपरिहारेण
सवर्णसंज्ञाबोध्यनिश्चयेंआणुदित्सूत्रेजबोधानापत्तिः।नचैतद्वाक्यार्थबोधात्प्राक्लिपपद्यति।होढइ
ति।हकारेणाकारग्रहणेसतियथस्यासन्नोतितस्यसवेस्याणुपलक्षणमिदं।ननुपर्णावर्णानामप्रसिद्धेरजूत्र सु५
हणेनेवसिद्धेणग्रहणंव्यर्थमतआह।यवलाइति।अमोनुनासिकानह्लाविवितिशिक्षायांयणइतिनोक्ते। कृ६
तेनसंयंतेसादीपरसवर्णेनिष्यन्नानुनासिकयवलानामनचिये तिद्वित्वंसिध्यति।हलोयमामितिलो
पस्तुवैकल्पिकःअत्रेदंबोध्यंव्यक्तिःपदार्थोगुणाभेदकाद्[redacted]सम्भिमानेनात्रसूत्रेणग्रहणमितिअ
तोभिसइत्यादौतपरकरणात्स्वहिवलोरितिसूत्रस्यवर्णग्रहणव्याख्यानाच्च।तपरपदेवहुव्रीहिपं
चमीतत्पुरुषाविसाहतःपरइत्यादिना।वर्णग्रहणेतुतत्सामर्थ्यादणा।वच्छिन्नसवर्णग्रहणबोधनेन [redacted]
तपरसूत्राप्रवृत्तिः।आद्योदाहरणमतोभिसइतिअंसोदाहरणंखट्वैडिरादेजितितिा।यद्यप्यत्रसंज्ञांतापबन
वतत्समकालस्तत्सवर्णोवाप्रसिद्धस्तथापितपरकरणात्भाष्यप्रामाण्याच्चतासरशब्दबोध्योवर्णः
स्वसमकालग्राहकरसर्थेनादोषः।इदंचविध्यर्थमेवाणग्रहणानानुवृत्तेः।गुणानांभेदकत्वयानपिवि

व्या॰ प्रौ॰ ल॰ धित्वेपि वृद्धिरादैजित्याद्या आकारां शेषा वकाशो नानेना तोभिस इत्यादौ परत्वेनाणुदित्सूत्र बाधः संख्याकृत व्य
१९ वहारस्य परस्परपरिहारेणैव दृष्टत्वेनाविरोधस्य सत्त्वात्। गुणो नाम भेदकत्वेन च काशाला बाध इति बो
19 ध्यं। अत्राव्यवधिमतोः शास्त्रान्तरेण वर्णस्यैव संज्ञायापि विशिष्टाद्विभक्त्युत्पत्तिः सौत्रत्वाद्बोध्या। न का
लस्य समस्य तदुच्चारणकालसमकालस्य सर्वस्य तद्ग्रहः। समकालस्यैवेति एवकारो न्यायसिद्धबाध्यबा
धकभावस्यानुवादक इति भावः। ज्ञातिपक्षे तु नियमार्थमेव सवर्णग्रहणानुवृत्तेः एवं गुणो नाम भेदक
त्वमिति वृद्धिरादैजिति सूत्रभाष्यसंमतसिद्धान्तपक्षेपि नियमार्थमेवेदमाकृतिम इत्यादौ विभक्तितका
र न प्रवर्तते उपसर्गादृतीतितपरकरणात्। कुद्दोरबिसाद्रौ दकार एवेति न दोषः सच पंचमीस
मासाभावे तकार इवोच्चारणार्थो मुखसुखार्थो वा। तपरसूत्रे वकारप्रश्लेषपक्षे तु धकारादिस्थानिको
दकारो बोध्यः। वृद्धिरा वृद्धिरादैजिति पदत्रयमिति न समासं तादिग्रहवृत्तिशंका तपरकरणमसं
पूर्वं तत्रापास्त्वमि देहार्थं तथा दीर्घार्थं प्रकृतसूत्रे भाष्ये त्रशास्त्रे गुणो नाम भेदकत्वं लोपकादाक्षिप्तसवर्णग्रहणार्थ
इतिभावः ॥२ ताभावस्योक्तत्वात् कृष्णौ कं ख्यं गंगौघ इत्यादौ त्रिमात्रव्याहृतये परार्थमपि। वृद्धिशब्दो न पदपरो
र्थपरत्वासंभवात्।। आदैचो वृद्धिपदाभिन्ना इति वा कार्थः पदपदार्थयोस्तादात्म्यस्यांगीकारात्।। १९

रामेति द्व्यक्षरं नाम मानभंगः पिनाकिन इत्यादौ तयोरभेदप्रतीतेरनुभवसिद्धत्वादित्यन्यत्र विस्तरः। वृद्धिशब्दस्य सं
ज्ञात्वं तु व्याख्यानात्। विधेयत्वेपि तस्य पूर्वं पाठो मंगलार्थः। अप्लुत एत्कालिकत्यादौ तथाकरणं विधेयस्य प्रथमप्रयोगे
ऽसाधुत्वभ्रमवारणायेति भाष्यस्पष्टं। सर्वशब्दानां सर्वार्थवाचकत्वेपि वाचकत्वस्य गृहीतस्यैव बोधजनकतया
संज्ञासूत्राणाम् ज्ञातशक्तिज्ञापकतया विधित्वं। किंच सर्वेषां सर्वार्थ इत्यभ्युपगमो योगिदृष्ट्या नास्मदृष्ट्या। सर्वश वाचका ४
ब्दानामर्थानां च विशिष्य ज्ञानाभावात् सामान्यतस्तथा ज्ञानं च न बोधोपयोगि शास्त्रं तस्मादाद्युद्देशे नैवप्रवृत्त
मिति बोध्यं। तत्रैव संकेतग्राहकशास्त्रकरणं स्वेच्छया वेसषां य दृष्टाप्राप्तत्वेन व्यवहारः स्वेच्छया संज्ञाः क्रियंत
इति वा० एतदुपदेशरूपसंकेतात्मा कृतत्र संज्ञाग्रहेणतासाम निखिलव्यवहारः। अत एव तत्तत्संज्ञाकरणं ज्ञा
नरूपप्रकरणादन्यार्थाग्रहणरूपनियमः कृत्रिमाकृत्रिमन्यायमूलतयोक्तः। संख्यासंज्ञासूत्रे भाष्ये० आर्थि
कमेवाणुंनियममाहाथसंज्ञासूत्रेष्वनियमत्वव्यवहारो व्यवहारायनियमः संज्ञायाः संज्ञिनि क्वचिदित्यादि
२४ नाकृतः। वाचकता बोधकत्वेपि तदनुत्पादे ज्ञानं शब्दार्थसंबंधनिरूपणहानिः। आसां च शिष्टप्रयुक्तत्वात् साधु
त्वमित्यन्यत्र विस्तरः। कार्यकालपक्षेपि मृजेर्वृद्धिरित्यादौ वृद्धिपदार्थजिज्ञासायां वृद्धिरादैजित्युपस्थितत्वात्तद
र्थबोधरूपे शक्तिग्रहे वृत्ते विधिवाक्यार्थबोधः। अत एव ष्यङः संप्रसारणमिति सूत्रे भाष्ये कार्यकालं संज्ञाप
रिभाषं यत्र क्वचित्सूपस्थितमिदं भवति यवि [illegible] नमित्तीत्युक्तं। ईदूदेतिसूत्रे भाष्येपि कार्यकालं संज्ञापरिभाषं प्रग्

ल०शा०शे० ङः प्रकृतेरुपस्थितमिदं भवति। ईदूदेद्द्विवचनं प्रगृह्यमिती तिनिष्ठत्तिसूत्रे कैयटोपि निष्ठासूत्रे संज्ञावाक्यं कृत्त्व
२० तुमिच्छतीत्यर्थः तदसाह। अत्र पक्षे एकत्र शक्तिग्रहे वृत्तेपि तस्य देशान्तरस्थस्यैव तत्रार्थे शक्तिरिति संभावनया प्रदेशां
20 तरस्थे बोधो न स्यादिति सर्वप्रदेशेषु तत्तत्पदशक्तिग्रहपूर्वकं विधिवाक्यार्थबोधः यथोद्देशं तु एकदैव शक्तिग्रहा
त्सर्वत्र बोध इति विशेषः। एतेन कार्यकालपक्षे तपरत्वं स्वपाठ्यार्थमेवादेशे च पदार्थस्य वृद्धिविशेषणतया विधे
यत्वेन सवर्णग्रहणाप्रसक्तेः यत्र वृद्धिपदं तत्रादैजितिसूपतिष्ठत इति क्रमेण संज्ञासंज्ञाणामर्थाद्विलपास्तमिद्
न्यत्र विस्तरः। अत्रात न्मादिनानामपि आदेचां ग्रहणं तेन प्रत्नालीयादिरिति हि। भूवादयो क्रियावाचिनः किंविक
स्यार्थकवाशब्दस्य निपातस्य धातुत्वे प्रातिपदिकत्वात्सुब्भावे पदं त्वानापत्तेः। तनु कोतु न दोषः वार्थस्य वि
कल्पस्य भूतभविष्यत्कालसंबंधाभावेन क्रियात्वाभावात्। अस्याद्यर्थस्यापि तत्त्वं भूतभविष्यत्कालसंबंधात्।
भ्वादयः किं आणवयति वटयती त्यादीनां धातुत्वे शास्त्रविषयतया तत्ता प्रसज्यापत्तेः सूत्रशेषे भाष्ये स्फुटमेत
त्। तं भ्वादीनामुद्दिष्टेन धात्वधिकारविहितकार्ये हि शपत्वादिना स्थितपाठग्रंशानुमानान्न तेषु दोषः प्राग्री
श्वा अधि[redacted]रीश्वर इत्यस्मिन्व्याप्यप्राङ्निपातादित्यधिकारः प्राक् निपाताः संज्ञा गतादिसंज्ञा इत्यर्थः तेन ता राम
भिः समावेशः अधिरीश्वरे विभाषा कृञीत्यत्र निपातादसंबंधश्चात्सिद्धः एषां द्योतकत्वं वाचकत्वं च यथाक्रम २०

र्थं यथाप्रयोगं बोध्यमित्यन्यत्र विस्तरः। असत्वे इति पर्युदासो लाघवादित्याह। अद्रव्येति। विशेष्यतया द्रव्याभिन्ना
र्थो द्रव्यार्थः। तेन क्रियाविशिष्टद्रव्यवाचिनां विप्रादिघटकप्रादीनां न। चादयः किं। स्वरादिपठितानामसत्व
वृत्तित्वे आ उदात्तत्वं मा भूदिति। उपसर्गाः योगग्रहणं यदर्थं प्रादीनामन्वयस्तं प्रत्येवोपसर्गत्वादीत्यर्थबोध
नार्थं तेन प्रगताः सेचकाः अस्मात् प्रसेचको ग्राम इत्यादौ पूर्वेण न। गतिश्चेति च उपसर्गसंज्ञासमावेशार्थः। तेन
प्रतिप्रणीतमित्यादौ गतिर्गतावनन्तर इति स्वर उपसर्गत्वात् णत्वं च सिध्यति। प्रादय इति योगविभागस्तु
क्रियायोगाभावेऽपि निपातत्वाय। [redacted] एतत्सिद्धमेवोपसर्गप्रतिरूपकस्य निपातत्वमुक्तं चाद्यन्तर्गणसूत्रे
तिदिक्॥ प्रपरेत्यादावनुकार्यानुकरणयोरभेदविवक्षया सुबनुत्पत्तिः। निसस् इति। अत्रेदं बोध्यं सान्तग्रहणेरां
तस्याग्रहणमेव। यत्र तु रुत्वमसिद्धं तत्र सान्तग्रहणेऽपि नसान्तग्रहणं तद्दृष्ट्या रुत्वस्यासिद्धत्वात्। यत्र तु रुत्वस्यासि
सद्विप्रयो ३ द्धत्वं यथा षत्वणत्वयोरुपसर्गत्वप्रतिषेधः परे दुरः षत्वणत्वयोरिति वार्त्तिके कृतरेफस्यान्तस्यापि ग्रहणं षत्वणत्व
योरित्यस्य तद्विधायकशास्त्रयोरित्यर्थात्। अत एव सुखमित्यादि दुर् दुः दुःशब्दपाठः स्वार्थकः सहि अपदुः सुदुस्थः
कुरिति दुः पूर्वकस्य धातोः कुप्रसवे साधुः अन्यथा दुस्पूर्वकाकु प्रसवे उपसर्गादित्येव षत्वे सिद्धे तद्वैयर्थ्यं

ल० शा० शे० स्पष्टमेव। नयास्य स्वरूपेणैवावयवार्थाभावादुपसर्गत्वाभावः॥ —असंतरूपेषु प्रतिष्ठादिषु उपसर्गत्वानापत्तेः। —अर्थवत्ता
२१ रोपणे च स्वरूपेऽपि तु सः। यत्तु रायत इत्यादौ रुत्वासिद्ध्या लत्वाभावार्थ इति दिक्। न वेति। इति लौकिकार्थपदा
५ = र्थकस्य शब्दपदार्थकत्वकृत्। यथा गवित्ययमाहेत्यादावनुकरणे। इह तु स्वं रूपमिति परिभाषणोच्छब्दप
नं ४ दार्थकस्यार्थपदार्थकत्वकृत्कुचिदितिः। पदार्थविपर्यासकृत्त्वं यथानुवाद वाक्ये। सचनवाशब्दाभ्यां इतिहेतुसदुकेऽसद्
प्रत्येकं संबध्यते व्याख्यानात्। तेन नवाशब्दयोरर्थौ संज्ञिनौ स्वं रूपमित्यस्य प्रत्याख्याने हि ते शब्दा अ सै० = ४
र्थ एवार्थकार्यस्याबाधात्। तयोरेव संज्ञित्वे तु विभाषाश्वेरित्यादौ नवाशब्दावादेशौ स्यातां। प्राप्तवि
भाषास्तु नास्योपयोगः। तासां पक्षे निवृत्तिमात्रफलकत्वात्। —अप्राप्तविभाषास्वपि न। तासां पक्षे वि
धिमात्रार्थत्वात्। —अप्राप्ते नेन निषेधासंभवात्। तस्मादुभयत्र विभाषार्थमिदं। विभाषाश्वेरित्यादौ
तेनात्राकजादिस्यादित्यायास्तां। अकजायस्यैकवाक्यतायन्नाप्याप संज्ञायां गुणादेरसिद्धत्वाच्चा लुगे
कवाक्यतापत्ता तु न। गुणादितोन्तरंगा उभयोरपि शास्त्रतः सुबाश्रयत्वात्। अत्र व्ययादौ एयक्षत्रियेत्यतो
लुगनुवर्त्तते। विहितेति। अन्यसंज्ञायां विहितत्वांशप्रवेशेन विहितप्रत्ययनिरूपितांगविशेषणा
मदित्यर्थः। आग्नुपूर्व्या माक्षिप्तांगस्यावयवरूपस्यैव प्रत्यासत्त्या ग्रहणमिति भावः। तेनकुमकारे राम०
ष्वट्टमादौ सन्निपातपरिभाषया व्ययसंज्ञानिवृत्तिद्वारा लुग्निवृत्तिपरभाष्येण न विरोधः। स्व
स्फच्चैमाविति। अत्राधिकरणशक्तिप्रधानस्य तु च्चैसमासवृत्तिविषये शक्तिमत्प्रधानत्वा

तद्धितीयांततपास्याद्द्वयः क्रांताद्यर्थे द्वितिसमासे ऽवयवभूतौ द्वे शब्दाट् व्ययात्परत्वेनलुक्स्यात्सम
दायस्यतुनाव्ययत्वंलिंगाद्यन्वयित्वादित्यभिमानः समुदायस्यापितस्य माभूदव्ययसमाधत्ते। यद्यपीति। तद्
नेति। शब्दस्यविशेष्यत्वात्स्ययोजनेसर्वेनामाव्ययसंज्ञायामितिवाचनिकस्तदंतविधिरितिभावः। नगौणे
इति। अयंभावः सामानाधिकरण्यसंबंधेनलिंगाद्यन्वयप्रत्यर्थबोधकत्वविशिष्टस्याव्ययपर्ययद्रव्यत्वेनस्य
व्ययपर्ययद्बोधकमितितादृशार्थीनांगणेऽनुकरणावश्यकत्वेद्वितरेप्यामनुकरणेमानाभावेनसमुदा
यस्यनाव्ययत्वमितिभावः। वस्तुतोत्रार्थेस्यप्रधानाप्रधानन्यायेनसर्वनामसंज्ञासाहचर्येणचप्रसिद्धं
नरपदेनगणेनपेक्षानुपसर्जनीभूतस्यैवलिंगाद्यन्वयिनोग्रहणेननसमुदायस्यनाव्ययवपवस्य
संज्ञा। अतएवभाष्येसर्वनामसंज्ञासूत्रस्थोपसर्जनप्रतिषेधानुवृत्त्यास्युद्धेसाविसादेर्विव्ययत्वाभा
वमुक्त्वातत्स्याख्यानरीत्यैवअत्रापितत्स्याख्यानमुक्तं। एवंचविहितविशेषणांशमगास्क्षेपीवाव्य
यीएवाव्ययात्परत्वस्याप्यभावात्। उच्चैरामप्याबाह्मणीभ्यांकृतनतिमित्यादेरभिधानेतुनमानं। अतएवभा
ष्यएतन्नोक्तं। आगतादितिनन्विदं सदृशं त्रिष्विति श्रुतिविरुद्धमतआह। लिंगेति। अयंभावः परंतो

ल॰भू॰प्रे॰ 142

भावः यथोपक्रमोयसंहाराभ्यां ब्रह्मपरायां त्र्यवस्थाः कृते भाष्ये त्रामाराणपादत्रोय संहारस्त्वयातत्समारूप
देवलिंगाद्यभावपरतायांतिविभक्तिवचनशब्दो कारकसंख्यावाचीप्रत्ययपरत्वेन्यतरत्वे यथोपनेः।
लिंगेऽपित्यादिविषयसप्रमीतन्नहि विषयेसादृष्टं च लिंगाद्यभावाश्रयत्वेनसादृश्याप्यवयोभावातिवि
क्तविषयं तस्य लिंगयोगसत्वात्संख्याभावस्य सर्वसाधारणाः। तदभावादिसादृश्यादेव पदहि विधं
रूपं तत्र प्राप्नोतीत्यर्थः प्रसंगादाह स्वप्नीत्यातिवशीभ्यां इ सत्वेनेह प्रयोगस्मित्यऽभागुरिराचार्यः
अपिसाहचर्यादिवेष्यादेरकारस्येवलोपः इदं भाष्ये नदृष्टमतोनिशादिशोरिगुणपधलक्षणो केदं नत्वा
देवटाप्। क्विनिरिशिनित्यपि। अतएव ङ्यापूप्रातिपदिकादिति सूत्रे आपूग्रहणं न कार्यमकारांताद्दा
पूनत्र अंतवद्भावात्प्रातिपदिकत्वेनैव सिद्धयस्तस्ये नकारांतक्कुंचोष्णिहादेवविशेति। अत्राप्य
कारांतादेवा क्कुंचान्नालभिंतउष्णिहाककुभदेवविश्रामिति। अंत्ये कप्रत्ययएवविषयद्गमल्का बहु
राजेतिडावंतार्थमापूग्रहणमितिभाष्ये उक्तं स्वेगंतु सत्वादीनां गुणानामुपचयापचयास्थितिरूपं राम॰
कमेणापुंस्त्रीनपुंसकाख्यमेकार्थशब्दान्यत्वाद्दृष्टलिंगान्यत्वमितिभाष्योक्तेरर्थे निष्ठं केवला

गच्छते। हेसख्यमानि॥ तेस्माद्वाचेत्यस्माध्येवेतिशिवं॥ शिवं॥ अचेतनस्यद्रव्यस्यादस्माद

न्वयिइयंव्यक्तिरिदंवस्त्वयंपदार्थइतित्रिविधव्यवहारस्यपदार्थमात्रेसत्वात्‌केनचिच्छब्देनकिंचि
द्वस्तुएकैकविशिष्टमेवकेनचित्पर्यायेणलिंगद्वयविशिष्टंकेनचिल्लिंगत्रयविशिष्टमितिलिंगानु
शासनादितोनिर्णेयं।तत्रस्तनकेशवतीस्त्रीस्याल्लोमशःपुरुषःस्मृतइत्यादिलौकिकलिंगासं
भवेशास्त्रीयंकार्यंशास्त्रीयेउक्तेएवात‌स्संभवेतुशास्त्रीयविशिष्टेलौकिकेशास्त्रीयमपिप्रवृत्तोबुध्य
तितथानुभवात्‌उपचयापचययोःस्थितेरपिसत्वेनतन्मात्रविवक्षायांसामान्येनपुंसकमितिप्रवा
दइत्यन्यत्रविस्तरः।अतइतिवर्णग्रहणात्तदंतविधिस्तदाहाकारांतस्यचेति।वाच्यंयत्स्त्रीत्वमितितद्व्या
ख्येयतेयत्तद्वाच्यंस्त्रीत्वमित्यर्थः।एवंव्याख्यानेफलमग्रेस्फुटंतत्रद्योत्स्यतइति।प्रत्ययार्थत्वेहितस्यवि
शेष्यतापत्तेःद्योत्यस्यतुविशेषणत्वमेवेतिस्पष्टमाकरे।वागादिषुविनापिटाबादिकंतस्यबोधाच्च।
अतएवव्यावक्रोशीत्यादौकर्मव्यतिहारेणचस्त्रियामितिणचिणचःस्त्रियामित्यञिचङीप्सिद्धिःव्य
तिलुनीतइत्यादौद्विर्बद्धंसुबद्धंभवतीतिन्यायेनसमुच्चयस्यदृष्टत्वात्‌टाप्स्यादिति।सचाधिकारात्प्राति
पदिकादेवतच्चसंनिधानादजादिरूपमेवाननन्वजादिष्वकारांततयाटाब्व्यर्थोतइत्येवसिद्धेरतआहाजा

ल॰ग्र॰श्रे॰

143

घुक्तिरिति। येन नाप्राप्तिन्यायादिति भावः। एतेन ङीषि कृते पि लिंगविशिष्टपरिभाषया टाप्चरितार्थ इत्य
पास्तं। ननु प्रत्ययविधौ यं च न्याय्य क्तत्वेनाजादिभ्यष्टाप्स्त्रीत्वे द्योत्ये इत्यर्थ एव युक्तः स्त्रीत्वं च प्रत्ययोस
त्पाद्रकृत्यर्थे निष्ठमिवेत्यत आह। अजादिभिरिति। व्याख्यानादेतत्तत्यष्टं तमिति भावः। अत्र त्पत्र तु स्त्रियामि
ति तदंतस्यापि विशेषणं व्याख्यानात्स्त्रियामेवं च पंचमूलानीय समासा पंचमूलत्वरीत्येव। पंचाजीति। पंचाना
मजानां समाहार इति द्विगावकारांतोत्तरपद इति स्त्रीत्वे द्विगोरिति ङीप्। अजादिष्विति व्याख्यानेऽमह
त्पूर्वे ग्रहणेनानुपसर्जनाधि कारेण च व नोर चेत्यत्र वोचापि तदंतविधिसंभवइति भावः। न च तदंतविधावपि शू
तत्वात्स्त्रियामित्यजादीनामेव विशेषणमिति वाच्यं। अनुपसर्जनाधिकारेण तदंतग्रहणस्यैव स्त्रियामित्यस्य तदंतविशेषणा
त्वमित्यर्थस्यापि बोधनात्। अत्र हीति समासेऽजशब्दस्यापि समाहारनिष्ठस्त्रीत्वसमुदायवाच्यं नाजशब्दमात्रवाच्यं सामर्थ्य
नाजादिमात्रवाच्यस्त्रीत्वस्यैव ग्रहादिति भावः। चटकेति। क्षिपकादित्वादित्वं न ह्रस्वइति। अत्र संज्ञायां तु भस्त्राफलेत्येव। संभस्त्रेति
सद्वृजिति मूलात्रजिति चपाककरोति प्राप्तस्य ङीषो बाधनार्थं। एवं च शेषत्तफलात्रिफलेत्यत्र बोध्यं। शूद्राचेति। जातिल
क्षणाङीषोपवादः। जातिश्चेद्बाचेत्यर्थः। पंचशूद्रीति समाहारे जातिवाचकत्वाभावात्। शूद्रशब्दार्थगतस्त्रीत्वाभावाच्च
न दोषः। जातिश्चेदित्यस्यफलमाह पुंयोगेत्विति। न चात्र गौणत्वं। सदृशलाक्षणिकस्यैव गौणत्वात्। गौणमुख्य

राम॰

कुकुरवीलमगदिषु सस्यप्रसारव्या नपचौ कुक्कुरस्य भं इत्येके समासः तद

न्यायस्य परकार्ये विषयत्वाच्चेति भावः। अमहत्पूर्वेत्यत्रापि जातिश्चेदिति संबध्यते। महत्पूर्वो न टापं लभते जातिश्चेद्भूच्येतितदर्थः। तत्फ
लं तु जात्यंतरनिवृत्तिपरत्वे पूर्वं जातिमात्रविवक्षया महत्कृत्वस्य शूद्रशब्देन मृगक्षीरकुक्कुटांडवत्समासे ततः स्त्रीत्वविवक्षायां
महती शूद्रेत्यर्थे महाशूद्रेति टाबेव। अमहत्पूर्वेत्यत्र जातिरित्यस्यासंबंधेऽनुपसर्जनाधिकारेणाप्रधाने न तदंतविधिस
त्वाज्जातेरिति ङीषूस्यात् शूद्रशब्दे जातिवाचकत्वस्य स्त्रीत्वे शूद्रशब्दार्थसमवेतत्वस्यापि सत्त्वेनात्र टापूनिबोध इति भाष्य
प्रदीपोद्योते निरूपितं। महाशूद्रीति। आभीरी तु महाशूद्रीत्यमरः। ब्राह्मणादुग्रकन्यायामाभीरः। न्रपाच्छूद्रायामुत्पन्नोऽग्र
जातिकन्या। अत्रानुलोमसंकराणां मातृजातिवृत्तित्वात्तत्रत्यां जातिमारोप्य शूद्रशब्दप्रयोग इत्यंशे शूद्रशब्दोऽर्थवानेवेति शू
द्रशब्दार्थे समवेतस्त्रीत्वमप्यत्रास्ति। तदर्थे समवेतस्त्रीत्वेपि शूद्रशब्दादेव टाप्प्राप्तेन तदंतात् ग्रहणवतेति निषेधादिति तदंत
विधिज्ञापकतानासंगता। अत एव शंखस्मृतौ ब्राह्मणक्षत्रियवैश्यैः क्षत्रियावैश्याशूद्रासूत्पन्नाः क्षत्रियवैश्यशूद्रा ए
व भवंतीत्युक्तमिति भावः। यत्तु शूद्राभीरमित्यादौ सामान्यविशेषवाचित्वाद्द्वंद्वाभावमाशंक्याभीरजात्यंतराणीति त्यदादी
नीति सूत्रे भाष्ये उक्तं तत्त्वनाशेपाभिप्रायेणेति न तद्विरोधः। अजादिराकृतिगणः। नेननमुन इति सूत्रे टायामादेशाइ
ति भाष्यप्रयोगः सिद्धः। प्रथमाध्याय चतुर्थपादे चमसवद्विशेषादिति सूत्रे शंकरभाष्यवाचस्पत्यो रजायां छागेति टा
वंतप्रयोगो दृश्यते तेन शब्दागशब्दोप्यजादिष्विति केचित्। उगितश्च। उगिद्वृत्तेन प्रातिपदिकस्य विशेषणात्तदंतविधि
ः प्रत्ययविधाविति निषेधस्तु न उगिद्वर्णग्रहणवर्जमित्युक्तेस्तदाहोगिदंतादिति। भवतीति। व्यपदेशिवद्भावेऽप्रातिप

ऋन्नेभ्यादीस्यादरि
तिभावः=१

144

दिकेनेति निषेधस्तु सूत्रोपात्तान्तादिशब्दविषय एवेति भावः। भवत्विति उगितः प्रातिपदिकस्यापि सत्त्वात् प्रत्ययमात्रग्रहणाभावे
न प्रत्ययग्रहणादिति परिभाषाया अत्र प्रवृत्त्यानियमेवमतीत्यादौ न दोषः। अंचतेस्त्विति न लोपिनोंचतेरित्यर्थः। नियमोपि नलोपं चति वि
षयस्यैवेति निरूपितं। व्यपदेशिवद्भावत्वमर्थस्यैष प्रतिपन्नये आह वन्नन्तादिति नन्वेवं प्रत्ययग्रहणपरिभाषया बहुधीवरीन
सिध्येदत आह तदंतान्चेति तत्परिभाषात्त्वद्ववन्नन्ते न प्रातिपदिकस्य विशेषणादिति भावः। सामान्येति। सूत्रे नुबंधानुच्चारणा
न्तदनुबंधकपरिभाषाया विषयो नेति भावः। इदं मतुवसोर्जीग्रो चा विति सूत्रे भाष्ये कैयटयोः स्पष्टं। इदं सूत्रेण ङीपू विधाय
कं किंतु ऋन्नेभ्य इति प्राप्त ङीबनुवादेन तत्स नियोगशिष्टरभावमात्रविधायकमुभयविधौ गौरवात्। शार्वरीति। इष्टधातोरन्ये
भ्योपि दृश्यत इति वनिप्। एतत्सिध्यर्थमाह हृश्यंतात्कुहितइति। अर्थवत्तो वनो ग्रहणान्नेह मघोनीकनिप्रत्ययांतनिपाति
तं सिद्धं बहुव्रीहेर्वा। अनो बहुव्रीहेरिति प्रतिषेधे प्राप्ते इदं। एतच्च वार्त्तिकमनुपधेति सिद्धं ङीबनुवादेन रादेशविधाय
कं अत एवेदमनुपधालोपिनि सुपर्वेत्यादौ नेति विकल्पार्थं सिद्धो वनो रचेत्येतत्सु ऋन्नेभ्य इत्येतन् ङीपू विषयमेवेत्युक्तं
।पक्षे डाबिति तिनह्रि वचने रूपत्रयं। क्तसमासांत इति उत्तरसूत्रे ऋच्यभिधेयायां तस्यैव संभवेनार्थाधिकारानुरोधा
दिति भावः। तेन पादयतेः क्विबंतस्य ग्रहणं न द्विपदीति द्वौ पादावस्या इति बहुव्रीहौ संख्यासुपूर्वस्येति पादस्यांत ४२ राम०
लोपस्ततो ङीपि पादः पत्। टाबृचि। पूर्वसूत्रप्राप्त ङीपोपवाद इति प्राचस्तच्चिंत्यं भाष्ये भाष्यादि भाष्यति सूत्रस्य भाष्यविरोधा

ष्टे ग्रहणं ग्रहणं भाष्ये ऽपि
दृष्टव्यं = १

त्वात्तत्रह्हि च्चतिपदविहितसमासांतानां कपो वैकल्पिकत्वे नकबभावे सावकाशत्व मुक्तं तद्रीत्या ऽस्यापि पूर्वसूत्रस्य वैकल्पि
कत्वेन तदभावे सावकाशत्वात् बहुव्रीहेरूर्ध्वसटूत्यत्रापि भाष्ये स्पष्टमेतत् अत एव डुन्यापूप्राति पदिकादिति सूत्रे पाद
शब्दस्समानार्थे मकारांतं पदशब्दं मंगीकृत्यैतन्नत्याख्यातं अपते च छंदसितस्यांऽसमाक्षरमेकं पदमेकः पाद इत्यर्थ इति च
भाष्योक्तं संगच्छते तेनद्वा हि ऋच्यपि एकेपदीरकपादित्तीष्यत एवं एवं चैकपादृग्गित्यस्य सूत्रमेतत्सिद्धये टाबृचीत्यत्राप्यन्यतरस्यां
ग्रहणमनुवर्त्यपादंतस्यऋच्यनभिधानमितितु न भाष्याशय‌ः डीबंत त्र्ययोगस्य सूत्ररीत्य स्यासिध्यापत्तेरिति बोध्यं केवलपा
दशब्दस्य स्त्रियांऋचि वाऽसंभवेनात्र तदंतविधिः असिद्धत्वादिति आपः परिगणिते ष्वभावान्ततत्र नलोपासिद्धत्वं टूट् च कस्य
येकाल पक्षे। अयं निषेधः प्रियपंचा द्रोपदीस्यादेतदंते पि। स्त्रियांपत्त्याप्नोतितन्न त्यर्थीदन उपधेति ङीबपि नेति बो
ध्यं ध नितं चेदं भाष्येपरे तु अत्र बहिरंगासिद्धत्वाप्राप्तिः नलोपस्यत त्वाभावात्संज्ञाकृतबहिरंगत्वानाश्रयणात्पंचेत्य
त्र तु स्त्रियांपत त्प्राप्नोतितन्नेत्यर्थी अयणाबला दभूतपूर्व षट्त्वाश्रयो निषेधः अत एव षट्संज्ञायां नलोपासिद्ध
त्वस्य न फलमिति न लोपः सुबित्यत्र भाष्ये उक्तमित्याहुः मनः। नङीबिति। अयमनइति चोक्तरीत्या टाङीपो रूभय
योरपि निषेधः एतेन सीम[redacted]भ्यां बहुयज्वभ्यां बहुधीवभ्यामित्यत्र डाप्ङीपोरभावेनलोपेटापूदुर्वारइत्यपास्तं
। डाबुभा। उभाभ्यां ग्रहणाभावे संनिहितस्यान एवानुवृत्तिः संभाव्येतवचनसामर्थ्यात् डापूनिषेधयोः पर्याये सिद्धे

नलोपइति सूत्रे बहु
विदुषि ग्रहणं भाष्ये
दृष्टव्यम् = ५

= अंतरंगाणां षट्संज्ञायां बहिरंगो नलोपोऽसिद्ध इति संज्ञाविधौ नेत्युक्तं टाभिति चैषट्संज्ञकत्वं पश्यति · अतो न स्यादि · ५ = कथं तर्हि संज्ञाविधौ पंचेति नो दाहरणं टाबा प्रतिषेधार्थं तथा च स्यादयमस्य न स्यादत आह पंचेति · ५ =

१०३ नन्वनउपधेत्यस्य नियमस्य विषये प्रमुदेन प्रवृत्तौ अनुपधात्वेऽपि निङीमूर्तेस्तत्र नियमतास्य यदुपधात्वेऽपि निबहुधीवरीत्यादौ ऋन्नेभ्यइत्येव ङीबिति तत्संनियोगशिष्टो नादेशः

ल॰प्र॰प्रे॰

त्यतरस्यामितिस्पष्टार्थे। भाष्ये त्वन्यतरस्यां ग्रहणं वाक्यभेदेनानो बहुव्रीहेरित्यनुवर्त्यते ततः पक्षे ऋन्नेभ्यइति ङीबर्थे एवं चानउपधे
तिसूत्रं नियमार्थमिति बहुधीवरीत्यत्र ऋन्नेभ्यइति ङीबिति तत्संनियोगे नरेफादेशः सिध्यतीति बहुव्रीहौ वेति वचनं प्रत्या
ख्यातं अनउपधेति च ऋन्नेभ्यइत्यस्यैवानुवाद इति नियमस्य विधिमुखेन प्रवृत्तावपि न दोषः अनः। बहुव्रीहेरूधसइत्यतो
बहुव्रीहेरिति संख्याव्ययादेरित्यतो ङीबिति चानुवर्त्तते। अनुपसर्जनादित्यनुवृत्तमप्यत्र न संबध्यते तत्सग्गृह्यमाणविशेष
णं तया गृह्यमाणस्य चान्नंत बहुव्रीहावनुपसर्जनस्यासंभवात् ध्वनितं चेदं वनो र चेति सूत्रे भाष्ये तत्र ह्यनो बहुव्रीहेरि
त्यनंतरमुपधालोपिनो वेति न्यासो दर्शितः विध्यर्थमिदं। अन्यतरस्यां ग्रहणं त्वनुपधालोपिस्तुपर्वत्यादौ सावकाशयोर्ङी
प्प्रतिषेधयोरुपधालोपिन्यनवकाशेन ङीपा वाधो मा भूदिति अन्यथा विधानसामर्थ्येन त्रयाणां पर्यायसिद्धौ नतद्दु
यर्थ्यं स्पष्टमेव। ककारादिति। अनेन वर्णमात्रं विवक्षितं मकार उच्चारणार्थ इति। न च कारिकेत्यत्राकारेण व्यवधाना
द्याप्परककाराभावेनेत्वानापत्तिरेकादेशे ऽप्यच: परस्मिन्निति [redacted] स्थानिवत्त्वाद्व्यवधानमेवापि परतोकारस्य
कात्पूर्वस्येत्यर्थेऽपि निर्दिष्टपरिभाषोपस्थितेर्व्यवहितेन प्राप्नोतीति वाच्यं। आनंतर्यांशोपस्थितावपि येन नाव्यवधा
नमिति न्यायेनाकारव्यवधानेऽपि प्रवृत्तेः रथकघादौ चनातिप्रसंगः केति संघातग्रहणे त्वेतिकादृत्याप सिद्धिः।
अकच्चकारस्योच्चारणार्थत्वेन पाकप्राप्त्यभावात्तन्नयासयोरिति ज्ञापकेन वर्णग्रहणमित्येव ज्ञाप्यते। अकद्विधाय

रामं॰

१९५

१८५

कस्यमकारवैशिष्ट्यमाश्रयेत्वप्रवृत्तिज्ञापकत्वाश्रयणोत्तु गौरवं। तावतापि प्रत्ययस्यत्वांशानुपपत्तेश्वानच वर्णग्रहणापक्षे इति काद्रूत्या
दावकारद्वयमवधानादित्वाप्राप्तिः द्वयोरकारयोरेकादेशे टापासहैकादेशस्यस्थानिवद्भावादेकेनैवाकारेणाव्यवधानात्। पुनःस्था
निवत्त्वं तु न। लक्ष्ये [illegible] लक्षणस्य सकृदेव प्रवृत्तेः टापासहैकादेशस्यस्थानिवत्त्वं विना पूर्वैकादेशस्यस्थानिवत्त्वं तु वक्तुमशक्यं।
तस्य टाबेकादेशेनापहारेण दर्शनात्। अत एव न यासयोरिति निषेधसार्थक्यं। स्यग्रहणं तु स्पष्टार्थं केवलककारस्य प्रत्य
यस्याभावात्। अस्तु पद इति बहुव्रीहिणा तांगविशेषणं। बहुचमिति केत्यादाविताना पत्तेः प्रत्ययलक्षणेनांगस्य सुपूर्वत्वात्।
न लुमतेति तु नात्र लुमता लुप्ते प्रत्यये परं गतं तस्य कार्ये तन्निषेधप्रवृत्तेः इदं तु टाप्यंगमिति दिक्। सर्विकेति। अव्ययसर्वना
म्नामित्यकच्। कारिकेति करोतेर्ण्वुल्। नो शब्दान्त्वार्थेकः सुपः परेणेति प्रसज्यप्रतिषेधेन व्याख्याने फलमाह बहुपरि
व्राजकेति। पर्युदासे हि समुदायस्य सुपूर्भिन्नत्वेन सुबंतभिन्नत्वेन च ततः परत्वादित्वं दुर्वारमिति भावः परिपूर्वाद्व्रजेर्ण्वुल्लि
बहुव्रीहौ सुपो लुक्यपि प्रत्ययलक्षणेनापः सुबंतात्परत्वं बोध्यं। कटकेति। आपा सह सवर्णदीर्घे तत्पूर्ववर्णादंगसंज्ञके बलीयस्त्वा
२३ द्यवादत्वाद्वांत्यककारात्परस्याकोऽसित्वं स्यादिति भावः। मामकेति। कस्य प्रत्ययस्थत्वाभावादप्राप्ते वचनं। ममेयमिति विग्रहे
युष्मदस्मदोरन्यतरस्यामित्यणि तवकममकावेकवचने इति ममकादेशे आदिवृद्धिः। नराणिति। केशान्हरतीत्यस्यादेश्च उपपदे
शाइत्याते। आतोनुपसर्गे इति के आतो लोप इटि चेत्यालोपः। नयासयोः। प्रत्ययस्यादिति प्राप्ते निषेधोयं। यकेति। यत्त

दोरकचूत्यदाघत्वेटापूर्वसंनिपातपरिभाषाऽस्मादेवनिषेधान्निर्देशाज्ज्ञानित्येतितद्दूरोधात्कथंदाविति नर्ष्णकंचात्यकन्नश्चेतिमृ
द्स्तिकनितिइत्वभूतनिर्देशे नह्यापकेनास्येत्वंवारयितुंशक्यमितिभाष्यकृतः पंचभिर्मृत्तिकाभिः क्रीतइत्यर्थेपंचमृत्तिकइत्य
स्यानभिधानमितितद्दाशयः अत्रत्यिकनिकर्त्रव्येः कारोच्चारणादित्वंनेतिनवक्तुंशक्यंपंचोपत्यकोग्रामइत्यादावकारस्य वर्ण
नापत्तेः टापोलुकिप्रत्ययलक्षणांस्यानिवत्वंचनउभयोरपिनलुमतेत्यनेननिषेधात् अतएवकर्तीत्यादौवार्त्तिकमतेपिन
गुणाइत्यन्यत्रविस्तरः आशिषिवुं। आशिषिविहितस्यवुनोस्येत्वंनेत्यर्थः। जीवतादित्यर्थेआशिषिचेतिवुन्। दिवदत्तशब्दाद्वनु
कंपायोकन्यनजातोचविभाषालोपोवक्तव्यइतिदत्तशब्दस्यलोपः दिवदत्तिकेत्युपन्यासस्तुदत्तलोपमभिव्यक्तुं ध्रुवकेतिध्रुस्थै
र्येपचाद्यचिकुटादित्वात्गुणाभावेउवङ् ततःस्वार्थ्यज्ञातार्थेकः केशादिहस्वःपुनःस्वार्थेटाप्टेः संज्ञायांकन् वार्तिकोक्ताग
णाआकृतिगणाःतेनकन्यकाध्रुवकाअल्लकादृष्टकादयःसाधवः। उदीचामित्येतिअत्रापिशकुनाविति संबध्यते। तेनान्यत्रनि
त्यमेवेत्वं। सूतकापुत्रिपुत्रकेत्यकारसहितःपाठोपपाठःकेयटाद्यसंमतेः सूतशब्दात्स्वार्थेकन्। वृंदारकशब्दाच्चवृंदाभ्यामार
कनूइतिमत्वर्थीयआरकन्। वृंदारकशब्दोमुख्यवाचीत्रिलिंगइतिभावः डीनइतिशार्ङ्गरवादित्वाज्ज्ञातस्येतिभावः। अन्यत्र
। सूतकादौ। उदीचांयकपूर्वेत्वंचाव्यवहितमेवएवंप्रत्ययस्थादितिसूत्रेकात्पूर्वत्वमपिउदात्तस्वरितयोरित्यादाविवानुवादे
पिनिर्दिष्टपरिभाषाप्रवृत्तेस्तेनक्षणाशब्दात्केइस्वेइत्वविकल्पोना। नेत्यनुवृत्तावपिनिषेधविकल्पेवि धिविकल्पस्यफ

लितत्वादाहेहेति। आतं किमिति। उदीचांयकपूर्वोयाइत्येवास्तुयकपूर्वस्त्रीबोधकाकारस्येत्यर्थः सांकाश्यकेचनातिप्रसंगः प्रत्ययावय
वत्वेनाकारस्यस्त्रीबोधकत्वाभावादितिप्रश्नः बहुलक्ष्यसंस्कारानुरोधादवयवषष्ठ्येवस्यात्। नचप्रतिपदोक्तस्त्रीप्रत्ययस्यैवात्रग्रहणं
विशिष्यतदनुपादानादित्युत्तरं। स्त्रीप्रत्ययस्यकिमिति। यकपूर्वायाइतिस्त्रीलिंगनिर्देशः किमर्थइतिप्रश्नः धात्वंतेति। धात्वंतयकारक
कारपूर्वयोरकारयोरित्यर्थः इत्वमितिशेषः भस्त्रेषा। अयमपिनिषेधविकल्पइत्याहुः। तद्वइति। अत्राप्यातः स्थानइत्यनुवर्तते। तद्वंते
ति। येनविधिरितिसूत्रेत्यदादिविधिभस्त्रादिग्रहणंचज्ञयोज्ञानमितिभाष्यात्। अपिनानञ्भिन्नपूर्वाणामपूर्वाणांचसंग्रहः। अनञ्पूर्वा
णामपीतिस्पष्टार्थं। पदांगाधिकारेतस्यचेतिसिद्धेः उपसर्जनार्थमिति। एवंचानुपसर्जनेआदाचार्याणामित्यात्वंभवत्येवोपसर्जने
स्यचारितार्थ्येनबाधेमानाभावात्। अन्यस्य। अनुपसर्जनस्य। उत्तरसूत्रेमभाषितपुंस्काच्चेति। अंतर्वर्तिनीमिति। नएतइत्युदु
तिष्ठितेअकचिकृतेअकृतेवानञ्तत्पुरुषेंतरंगात्वपीतिस्यायेनतस्यटाघत्वात्माकूस्सुपोलुकितत्तोकचिवापुनर्विशिष्टात्सुपि
त्यटाघत्वेटापिसमासात्पूर्वोत्पन्नसुपः परएवटाविति भावः बहुव्रीहौतुप्रियेयतकाप्रियेयतकत्काबाकबभावेप्रियेयतकाइति
वसर्वथानेत्वप्राप्तिः अनेषकेति। अज्ञातैषेषकानएषकेतिविग्रहः पूर्वंनञ्समासेऽज्ञातानेषेति। असंभवादितिएषा
इतिनिर्देशात्संज्ञोपसर्जनयोरप्राप्तेरितिभावः अकजर्हइति। एवंचतदकारस्यातः स्थानिकत्वाभावइति [redacted] तिभावः
अर्थांतरेत्विति। आत्मज्ञातिधनेष्वित्यर्थः स्वोज्ञातावात्मनिस्वंत्रिष्वात्मीयेस्वोस्त्रियांधनेइतिकोशादितिभावः कप्रत्ययांतत्वा

१०५=नच ष्याप् प्रातिपदिकात् स्वार्थे ष्याप्न्महत्त्वात् ष्यावंता नाद्रियते परो आत स्वात्मनिमद्व्याद्वृत्तेरपीत्यर्थ इति बोध्य इति। अत स्वार्थिकाना र्थ्यतादिते पुंवद्भाव ष्या मात ष्या
महत्त्व संबंधस्य नृत्येन टाप्प्रष्टेः [illegible] ते एव मे स्तितिभाव। स्वपदेन च वेदं ष्याप् सूत्रे = ३ =

ल·प्र·श्री·

ष॰१

दितितत्र च तान्वर्ण्णत्रिविभक्त्यास्तु पः परत्वं केनव्यवधानादितिभावः संज्ञापूरणयोश्चेति निषेधेन संज्ञाया अपि भाषितपुंस्कत्वबोधनेन संज्ञाभू
तेना भाषितपुंस्काच्चेत्यनेन न सिद्धिः आत्मीयत्व पुरस्कारेणैव संज्ञाकरणादिति बोध्यं। नित्यमेवेति। तत्र ह्यकचिकृते आतः स्थानिकत्वाभाव ३ इतिभावः
वः एवमत्यंतस्वार्थिकका ते पि नित्यमेवेत्वं अकचोत्यंतस्वार्थिकापवादत्वाभावात्। निःस्वकेति स्वस्मात् निष्क्रांतेतिविग्रहः उपसर्जन
ह्रस्वः टाप् अज्ञातादौ कः। अभाषिता स्त्री विषयाच्चेति नो क्तं स्त्रीनपुंसकदामनशब्दात् डाप्यज्ञाता दामा दामिका दामाका दामके त्यसिद्ध्या
पत्ते: विहितस्येति व्याख्याने फलमाह बहुव्रीहेरिति अविद्यमाना खट्वा [redacted]
यस्या इति विग्रहे पाक्षिककबभावे गोस्त्रियोरित्युपसर्जनह्रस्वे ऽखट्वप्राबृदादिस्तुप्यज्ञातादौ के स्तुपूलुकि केणाइ
ति ह्रस्वे पुनष्टाप्य भाषितपुंस्काद्विहिताकारस्थानिकाकाराभावेनेत्वविकल्पाप्राप्तावुत्सर्गेण नित्यमेवेत्वं परविशेषणात्वे तु ताट्ट
शखट्वशब्दात्परत्वेन दोषः स्यादेवेति भावः। शेषेविकेकपीति नखट्वाश्वित्यवस्थायां कपि स्तुपूलुकि प्रत्ययलक्षणेन भागद्वयं
समुदितत्वात् समाससंज्ञायां समासांत इति शास्त्रबलात्कवंतस्येव समासत्वेनोपसर्जनस्त्रीप्रत्ययांततसमासस्यैव प्रातिप
दिकाभावात् गोस्त्रियोरिति ह्रस्वाभावे केणाइति ह्रस्वेन कपीति निषिद्धे आपोन्यतरस्यामिति ह्रस्वे कपः प्राग्वन्निनः खट्व
शब्दात्परस्यापो ऽभाषितपुंस्काद्विहितत्वेन तत्स्थानिकाकारस्यायं विकल्पो ह्रस्वाभावे तु अखट्वाकेतीति भावः। अयमेवेति एका०
। आचारक्विबंतप्रकृतिककर्तृक्विबंतानामनभिधानमेव स्त्रियामेतस्याश्चमाणपा तं च स्त्रीगोचक्रयोधनं यस्स सपंच

प्रा॰१ पं॰१

147
१४७

गवधन इत्यत्रार्थवत्त्वेनोक्तार्थवत्त्वाभावाद् अजंतस्य प्रातिपदिकत्वाभावेन न ङीप्। आपिशलिना प्रोक्तमधीते आपिशला
ब्राह्मणीत्यत्र तु न ङीप् प्रोक्ताणः स्त्रियामवर्जनात् अध्येत्रणस्तु लुप्तः। अणो कारद् इति व्याख्यानेन वर्णाश्रये प्रत्ययलक्षणाभा
वात् अध्येत्रर्थगतस्त्रीत्वमादाय तदणनिमित्तकस्य न प्राप्तिः स्त्रियामित्यस्य गृह्यमाणाविशेषणत्वात् तदणएतत्स्त्रीत्वेऽवर्जि
नात् अत एव काशकृत्स्निना प्रोक्तां मीमांसामधीते काशकृत्स्ना ब्राह्मणीत्यत्रापि न ङीप् लक्ष्ये लक्षणस्येति न्यायान्। तस्मा
द् इह कुरुचरेत्यत्र तद्भाव इत्येतत्र च तदन्तविधिं विना प्राप्तिरेव नास्ति। प्राप्तौ तु तदन्तविधौ प्राधान्याद् एतदारंभात् स्त्रियामिति ङीप् प्र
कृतिविशेषणमेवात एव धीवानमतिक्रान्ता अतिधीवरीति सिद्धं। एवं चापिशलेत्याद्यस्येव व्यावर्त्यं अनुपसर्जनादिति च साम
र्थ्यात् गृह्यमाणाविशेषणमेवेति भावः। तदंतविधिमिति। अणंतादेः प्रातिपदिकविशेषणत्वेनाणंतांतत्वेवंरूप[illegible]मित्यर्थ
ः अन्यथा प्रत्ययविधौ प्रतिषेधात् तस्य दुर्लभः स्यात्। प्रत्ययग्रहणपरिभाषालभ्यस्य तु नायं निषेधः प्रातिपदिकादित्यनेन तस
हानन्वयापत्ते। तत्फलं कौम्भकारेयसिद्धिः अन्यथा कुम्भकारेय इत्यापद्येत कुम्भेन समासे ङीपि कुम्भविशिष्टस्यापत्ये न
योगिकार्यर्थे तद्योगस्य वक्तुमशक्यत्वात् कदाचिन्नोपि दृष्टः किं कुम्भशब्दोकारे वृद्धभावस्याप्यापत्तेः निष्कृष्येकार्थी
भावरूपवृत्तिनिमित्तमिति तु वक्तुमशक्यं तद्धितार्थे सुत्तरपदे समासविधानात् समुदाये नैकार्थीभावे ऽवयवेना   निष्क [illegible]
पितस्येव सत्त्वात्॥ कृत् ग्रहणपरिभाषायाः कृन्मात्रग्रहणे प्रवृत्यानतयाविशिष्टादेव ङीबुत्पत्तिप्रत्याख्याना न च तद

तद्ग्रहणेऽपि कारग्रहणस्य व्यपदेशिवद्भावेनाणन्तान्तत्वात्ततोऽपि कदाचिन्ङीपि कुंभकारेयो दुर्वारः किं च समुदायान्ङीप्यपि स्त्रीप्रत्ययेन
तदादिनियमाभावेन केवलादपि कदाचिद्वृकि स दुर्वार इति वाच्यं एतदधिकारादेव ङ्या पकारसहायेऽस्य व्यपदेशिवद्भावप्रवृत्तेः अर्थ
वत्सूत्रेऽकार्थवत्त्वाभावेनाणन्तस्याप्रातिपदिकत्वाच्च तदादिनियमाभावेनाधिकस्य कार्यं बोध्यते न तु न्यूनस्येत्यदोषाच्च अन्यथा तद्
तद्ग्रहणे फलाभावेन तद्वैयर्थ्यं स्पष्टमेव। एतदेवाभिप्रेत्यात्र भाष्ये उक्तं समासे च क्नतेऽवयवादुत्पन्नोऽवयवस्य वृद्धिः स्यादिति।
येन विधिरिति सूत्रे च प्रत्ययग्रहणे तदादितदन्तविधिः प्रयोजनं गार्ग्यायणः परमगार्ग्यायणादिति उक्तं भाष्ये। तत्रैकदेशान्वय
याभावे परमश्चासौ गार्ग्यायण इति तदर्थो वाच्यस्तथा सति नैव परमगार्ग्यात्प्रसक्तिरिति तत्प्रयोजनत्वोक्तिरसंगता स्यात्। मम तु
परमगार्ग्यस्यापत्यमित्यर्थेऽप्युक्तन्यायाद्गार्ग्यशब्दादेव प्रत्ययो न तु परमगार्ग्यात्तथा सति वा परमगार्ग्यायणादिति स्यादिति तत्प्र
योजनत्वोक्तिसंगतिः कैयटोऽपि तदादिनियमावश्यकत्वप्रदर्शनाय परमगार्ग्यायणाद्युपन्यास इत्युक्तवान्। यत्तु सर्वा
दिसूत्रे भाष्येऽनुपसर्जनादिति योगः प्रत्याख्यायत इत्युक्तं तत्तु वार्तिककृता तस्य प्रत्याख्यानात्तदभिप्रायकमिति भाष्यप्र
दीपोद्योते विस्तरः। टिड्ढाठित्येव सिद्धे ठकुठञोह पादावंठन्त्रिठयोर्व्यावृत्त्यर्थं। अदंतमिति। प्रत्यासत्त्या टिदाद्यवयवाका
रान्तमित्यर्थः। तेन पंचाख्येत्याद्यौ ठनि भिन्नोऽपि न ङीप्। कुरुचरीति। कुरुषु चरतीत्यधिकरणे उपपदे चरेष्टः। टित्त्वोऽप्र राम०
त्ययस्यापि सत्त्वात्प्रत्ययग्रहणपरिभाषाया अप्रवृत्त्याऽत्र टिदन्तत्वं कुरुचरशब्दस्येति बोध्यं। वक्ष्यमाणेति। वचेर्लृटः

148

१४८

शान चूडिति त्वादि ति स्थानिवत्त्वेनेत्यादि ॥ नल्पपीति लिंगादित्वादेर् शास्त्रीयस्याप्यतिदेशो नुबंधकार्येऽनल्विधाविति निषेधा
प्रवृत्तिश्चेति भावः ॥ ङित्त्वेनेति । लिङादेशानां स्थानिवत्त्वेनैव सिद्धेर्यच्च्यस्य सुमेवात द्वि स्वरूपवे स्वचरितार्थतया समुदायो
पकारकं । नचेदं ङित्त्वं स्तु पादिस्यादावनिगन्तक्षणावृद्धिनिषेधार्थमिति वाच्यं । विनिगमनाविरहात् । उतश्चौदिति वक्ष्यमाणवृ
द्धिग्रहणेन स्थानिनिर्देशपीत्यपरिभाषोपस्थित्यात स्यास्त्रपि डूल्लक्षणात्वाच्च । नन्वेवं ब्रूतादित्यत्रानुवर्द्धते प्राप्नोतीत्याऽपा
नुबंधकार्यस्य तदादेशाभावे पितिपः पित्त्वस्य तदादेशेनातङ्यभावकल्पने मानाभावादत आह श्नद्इति । कचिदिति ।
लक्ष्यानुरोधेन च व्यवस्था परे तु यासुटो ङित्त्वं न ज्ञापकं पिदर्थं ङित्त्वमिति भाष्यात् सार्वधातुकमिति सूत्रेऽपिदित्याव
र्त्यप्रसज्यप्रतिषेधसिद्धेन ङित्त्वपिन्न पित्त्र ङित्वेत्यनेन हलः श्नद्इति सूत्रभाष्योक्ते नापिन्तु ङित्वा प्रसक्तेः शान
चः शित्त्वमपि तत्सूत्र एव भाष्ये प्रत्याख्यातं हेर पित्त्वस्य नातङो ङित्त्वस्यैव यथ्योपत्तिश्च ज्ञापकत्वे दूषणमप्युक्तं भा
ष्येतस्माद्धस्व मारोपात्रोऽसत्यभिधानेऽज्ञादिपाठाद्वा पूयन्तु क्किति चेति सूत्रभाष्ये यासुटो ङिद्वचनस्य न ङिदादे
शानां ङित्त्वमित्यर्थे ज्ञापकता नोक्तातन्तु वार्त्तिकमतं ङित्त्वपिन्नेत्यादेस्तेनानुक्तेः यदपि गाङ्कुटादी तिसूत्रे गाङो ङि
त्वं सानुबंधकादेशेनुबंधास्थानिवत्त्वस्य ज्ञापकमुक्तं वार्त्तिककृतातदपि प्रयोजनाभावादित्यादिना भाष्ये दूषि
शिलायाढश्यस्य तमित्याहुः । निरनुबंधकस्यापि त्रियां तृजेरसंभवात्सानुबंधकस्यढको ग्रहणमित्याह सोपरोयोति । सुपरौ शा दृ

ल·प्र·श्रे०

इयत्येस्त्रीभ्यो ढगितिढक्रूस्यषष्ठं चेदं माध्येरें द्रीतिस्मास्यदेवोत्तस्वराः। तुमदद्घ्नीत्यादिप्रमाणे द्वयसचूदघ्नज्मात्रचः संख्यायाः अवय
वेतयपू। मात्रजिति मात्रग्रहणाद्दारभ्याचश्चकारेणप्रत्याहारइत्सुभयीतिसिद्धिः नत्रद्वयचश्चात्ययांतरं। अतएवोभयशब्द
स्यजसि सर्वनामत्वविकल्पोनेति नवेतीत्यत्रभाष्यस्पष्टं। आक्षिकोतिते नदीव्यतीति ठक्रूतदस्यपराणमित्यधिकारेलवणात्तु
ञ्। यादृष्यांत्यदादिषु दृशइतिकञ्। इत्वरीतिइ ग्नशझीतिकरप्। अनुबंधद्वयोपादानंस्पष्टार्थं वरज्याक्रं हृतेरल्पतरेणा
पिसिद्धेः चौरीति चुराशीलमस्याइत्यर्थेः नञ्स्नञ्तरुणात्तलुनयोवेयस्यचरमइतिङीपिसिद्धेविंगोरादिपाठात्परत्वात्
प्राप्तेनङीषावाधनायपुनरत्रग्रहणंतयोश्चखरेविशेषः एनो हि त्रोरस्यलोवसुतनंतत्वादाद्युदात्तो। स्त्रीपुंसाभ्यांन
स्नञ्जो। ग्रहणमित्यधिकारेष्णक्रियस्यारीकक्रुआढ्यसुभगेतिख्युन्। पञ्च। प्राचांष्फङ्त्येत्रयबैञ एवानुवृत्त्ये
योगविभागः। हि [redacted] ये हलस्त। हलइतिपंचमीयसेति सूत्रादी
तीत्यनुवर्त्तते सूर्येति ष्येसतोयउपधायाइतिचाय लोपेऽङ्लोपस्याभीयासिद्धत्वाद्यसेकारपरत्वाभावाद्वचनसामर्थ्यका
योपधाग्रहणानुवृत्तिः। अनपत्याधिकारस्थादिति। अपत्याधिकारस्यभिन्नादित्यर्थः यत्रशब्देनव्याख्यानादपत्याधि
कारस्थस्यैवग्रहणमितिभावः प्राचांष्फायञइतिवर्त्तते। अत इति च। यञो याकारइतिचार्थेऽन्ते नवतंङीत्यत्रो
दीचांमतेसावकाशंशार्ङ्गरवादिङीनं बाधित्वा आवद्यायनीत्यादाविवसर्वत्रग्रहणात्प्राचांमतेप्राप्तोपिष्फोनात्र

अनुदात्तस्य च... भावः

तृ

रास०

149

१८८

हि वर्त्तंडाब्नेति यञो लुक् स्त्रियामिति लुक् वर्णो ऽयत्वाच्च न प्रत्ययलक्षणं। बः। आ आदिर्ञिटुडव इति सूत्रादादिरित्यनुवर्त्तते। प्र
त्ययस्येति किं बोडश षष उत्वमित्यत्र षषूष्णान्तस्य निपातनादुपदेशस्थायं षकारः वस्तुत उपदेश इत्यस्य स्वरितत्वमेव नेति पूर्वं
निरूपितं आदिर्ञिटुडव इति सूत्रस्त्रावश्यकमुपरंजकतयात्रापि संबंधितं। आयनो न स्पनेत्वं फिनो निरूकरणात्। तत्राह चर्यादी
नोपि न स्पनेत्वं। आदिग्रहणं किं उरूदघ्नं प्रत्यये इति किं फक्कति खनति। खचू घञो दीर्घि ण्पनोः खित्यनव्ययस्येत्यादि
लिंगादिसंज्ञेवनादेशाः। उणादीनां बहुलवचनान्नादेशः। घचश्चित्वसामर्थ्यादेते प्रत्ययसंबंधादेशा उपदेशसंनि
योगशिष्टकार्यादपि पूर्वमेव तेनोक्तादात्त त्वाय चित्त्वस्य फलमन्यथा घुदात्तत्वे नैव सिद्धौ तद्धैयर्थ्यं स्पष्टमेव। न नु स्त्रिया
मेव ष्फ विधानात् उक्तार्थानामप्रयोग इति ङीबून स्यादत आह षित्वसामर्थ्यादिति। ष्फेणोक्ते पीति द्योतितेपीत्यर्थः
द्विर्बद्धं सुबद्धं भवतीति न्यायेन क्वचिन्मुख्यपस्य दृष्टत्वात् षित्वमपि तदाश्रयणे ज्ञापकं। सर्वत्र॥ सर्वेषां मते इत्यर्थस्त
दाह नित्यमिति प्राचामित्यस्य निवृत्त्या नित्यत्वे सिद्धेपि प्राचां ष्फ इत्यस्य सर्वत्रग्रहणापकर्षेण बाधकविषयेपि प्रवृत्त्य
र्थं ततः तेनावट्यापनीत्यत्रावट्याश्चेति चापं बाधित्वा प्राचां मते ष्फ एव। अवटो गर्गादिः चाप्तु उदीचां मते प्राप्त ङीबूबा
धनेन चरितार्थः सर्वत्रग्रहणात्तु बाधकत्वमेव चापो न तु अनंतरष्फबाधकत्वं चापि कृते तु न ष्फप्राप्तिरत इत्यधिका
रात् लोहितादिर्गर्गान्तर्गणः यद्यपि तत्र कतशाकलक इति पाठात् शाकलस्य लोहितादिकार्याद् बहिर्भूतत्वा ८

स्फाणो न ततः प्रामुतस्तथापि कर्तत्तेभ्यः करणादिभ्य इत्युभयत्रापि षष्ठी तत्पुरुषबहुव्रीह्योरेकशेषेण न दोषः कर्तन प्राप्तेः शाकं
ध्वादित्वात्पररूपं तेन शाकल्यायनी शाकल्यस्य छात्राः शाकला इति च सिद्धं। टापूङी पोरिति। कौरव्यशाङ्गृयोपध्यप्रतिषेधाद्य
पूर्वाङ्कशाङ्गृजातित्वान्ङीषिति भावः टापूङीपोरपवाद इति पाठस्तु प्रामादिकः। वयसि। प्राणिनां कालकृतावस्थाविशेषो
वयः वयसीत्यस्य वयोरूपे प्रवृत्तिनिमित्ते इत्यर्थस्तत्राह प्रथमवयोवाचिन इति तेनोक्तान शायेत्यादौ न। प्रकरणादि
ना वयः प्रतीतावपि नार्यत इत्याह कः। याविष्या ध्यादिवशादुक्तानाशेतेन तस्या अपि प्रतीतेः द्विवर्षेत्यादिरपि न वयोवाची शा
लादावपि प्रयोगात् कौमारयौवनवृद्धत्वभेदात् त्रीणि वयांसि त्रापुत्रश्चतुर्भागे श्चत्वारिवा। त्रानीका। समाहारे तद्धितार्थे
ति द्विगुः अकारान्तोत्तरपदत्वात् स्त्रीत्वं। अपरिमाण। अत्र परिमाणशब्देन परिमाणं तु सर्वत इति पारिभाषिकमेव गृह्य
ते। सुवर्णबिस्तो हेम्नोक्षे कर्षे बल्यम्। पर्णपलशातमिति कोशबले नोन्मान भूतबिस्तकंबल्यग्रहणं तु तन्मानस्य चेद्वि
स्तकंबल्ययोरेवेति नियमार्थं तेन द्विनिष्का सिद्धा द्विवर्षे भूताद्वाभ्यां शालाभ्यां क्रीतेत्यर्थे द्विवर्षा द्विशतानां तियङ् माने
द्विहस्ताभि तिरित्यादौ च निषेधः सिद्धः कांडांतादिति तुक्षेत्र एवेति नियमार्थं तेन द्विकाण्डी रज्जुरित्यत्र न। द्वौ बि
स्तौ पचतीति। पचेर्द्वीभावानुकूलो व्यापारोऽर्थः अत्रोन्मानत्वाद्व कौलुकूश्चाचितः शाकटो भारस्तु त्रैराचितः परिमाण

दाम॰

150

९५०

मित्येके । अन्ये चिन्त्यो दश भाराः स्युरित्युक्ते रत्नानामेतदिति एतत्तदपि नियमार्थं मित्यन्ये । प्रमाणे इति षोडश हस्तप्रमाणो दंड वा चक्रकांड
शब्दस्यायाममात्रपरिच्छेदकत्वेन प्रमाणत्वमिति भावः । पुरुषात्प्रमाणे । पुरुषस्योर्ध्वाधरदिगवस्थितवस्तुमात्रपरिच्छेदकत्वेनोन्मा
न त्वादुन्मानस्यैव हि स्वादरेवेति नियमान्निषेधाप्राप्तानित्यं ङीपि प्राप्ते विकल्पार्थमिदं । अत्र प्रमाणशब्दः परिच्छेदकमात्रप
रो न त्वायामपरिच्छेदकवाची । अत एव तस्य पुरुषविशेषणतानां संगतत्वाज्जातिवचनस्यापि पुरुषशब्दस्य पंचारत्निः पुरुषइ
ति शुल्बसूत्रादत्र प्रमाणादिति विशेषणाल्लोकव्यवहाराच्च परिच्छेदकवाचित्वमपि । द्विपुरुषीति । द्वौ पुरुषौ प्रमाणमस्या इ
त्यर्थे तदस्य परिमाणमिति प्रत्यययस्याध्यर्धेति लुकि उदाहरणं तत्र हि परिमाणशब्देनात्र सूत्रानुरोधात्परिच्छेदकमात्रस्य संख्यायाः संज्ञा
ग्रहणमिति सिद्धांतः । ऊधसोऽनङ् समासांतोयं तत्र स्त्रियामित्युपसंख्यानादाह स्त्रियामिति बहुव्रीहौ सक्थ्यक्ष्णोरित्यतो ब संघेति २६
हुव्रीहावित्यनुवर्त्तते । ङित्वाच्चान्त्यादेशत्वं । डाप् ङीप् निषेधे ष्विति । समासांतानामलौकिके वाक्ये एव प्रवृत्त्यापूर्वमनङो
प्राप्तिः अन उपधालोपिन इत्यत्रानुवृत्त्या ङीपोपि बाधः एतेन मध्येपवादन्यायाड्डाप्निषेधयोरिदं बाधकमिति भावः ङी सिद्धपास्य
षिति ङीपि तु कुंडोध्नूशब्दे पूर्वपदप्रकृतिस्वरेणाधकारोकारस्यानुदात्तत्वादुदात्त निवृत्तिस्वरप्राप्तौ तोदात्तत्वं न सि
ध्येत । कुंडमिवोधो यस्या इति विग्रहः । बहुव्रीहेः किं ऊधः प्राप्ता प्राप्तोधाः प्राप्तापन्ने चेति समासः । अव्ययग्रहणाननु
वृत्तेरिति अस्वरितत्वादिति भावः । निषेधावपीति । अपि नानउपधेति ङीप् । अनूग्रहणेनर्थकस्यापि ग्रहणात् । द्विहायनी
बालेति द्विहायनी द्विवर्षा गौरिति प्रायो वादद्त्यके वा लत्यस्य गोरित्यर्थे इत्यन्ये । नित्यं संज्ञा । ननु संज्ञाशब्दा नियतानुपूर्वी

काश्च नादयश्छंदसि च दृष्टस्यैव विधानमिति ङीबभावविधिः छस्स तत्र प्रयोगासंभवादनउपधेत्येव सिद्धे ङ्ग्रहणं व्यर्थमिति चेदु
त्तरार्थत्वात् योगविभागस्तु व्यर्थ एव तश्चानयनूलक्षणान्तरसिद्धमुदाहरति वेदे पंचदाम्नीति क्वचित्तु शतमूर्ध्नीति पाठः केवल
मामक । अस्मच्छब्दादणि तवकममकावेकवचन इति ममकादेशः भागशब्दा त्पुल्लिंगात्स्वार्थे धेये स्वार्थिके पुल्लिंगातिवृत्तेर
पि सत्वात्स्त्रीत्वं पापशब्दोऽपि अघ चात इति वर्त्तमानः स्त्रियां । अपरः पववर्गमध्याघृतादित्वादन्तोदात्तः उतापरं पक्षिदेवानि
त्यादौ उतापरीभ्यो मघवेत्यादौ चान्तोदात्तपाठात् । पूर्वमनयन्नापरमित्यादौ पठ्यमानमाद्युदात्तत्वमपि वृषादित्वात् । अपरा
पूर्वा मम्प्रेतीत्यादावन्तादिपाठादाबपि । आर्येणाकृतेति प्राक्तु वृत्यन्तेः समासे दन्तत्वं । मेत्र वशब्दो व्युत्पन्नश्चौषधेरूढः भि
षजइदमित्यणि भेषजशब्दोऽपि तत्त्वासु मंगलीरियं वधूरिति तु मत्वर्थीये ई प्रत्यये बोध्यं । प्रकृतिभागावितिं नुक् स नियो
गेनेति भावः । मनुर्विति । वत्त्वं तु मादुपधाया इति सिद्धं । पत्युर्नसंबंध इति स्त्रिया इत्यर्थः संयोगपदं संबंधोपलक्षणं । संब
धश्च यज्ञफलप्रतियोगिकस्वामित्वं तदाह । तत्कर्त्तृकेति । विभाषा । सह शब्दो विद्यमानवाची पूर्वशब्दोऽवयववाची व्याख्या
नात् तत्र केवलपतिशब्दस्य विद्यमानपूर्वावयवत्वासंभवाद्व्यभिचाराच्च पतिशब्देन तदन्तं गृह्यत इत्याह पतिशब्दांतसे
त्यादि । नपत्युरिति । सपूर्वस्येत्यनेन पत्यंतस्य ग्रहणमाणत्वादिति भावः । बहवो वृषलपतयोऽस्या इति कर्मधारयोत्तरप
दबहुव्रीहौ वारणायेहार्थोऽप्यनुपसर्जनपदसंबंध इत्यन्ये । बहुव्रीहावपि त्वनुपसर्जनोपलक्षणं ते न पतिमतिक्रांता ।

राम०

151

१५१

ति पत्नीत्यपि। व्यस्ते इति। विभाषा सपूर्वस्येत्यत्र यज्ञसंयोग इति न संबध्यते। भाष्ये कथंतु वृषलस्य पत्नीति व्यस्ते एव प्रश्नात्। वृषलत्वे
न यज्ञसंयोगाभावात्। पूर्वेणाप्राप्ते सपूर्वत्वाभावाच्चेतरेणाप्राप्तेरिति भावः। उपचारादिति। पाणिग्रहणाश्रयादिति भावः। यद्वेति। इदं प्रौढवा
त्। तत्प्रकृतिकत्वे किंचिद्दृढमानाभावात्। पूर्वसूत्रे यज्ञसंयोग इति तु वृषलस्य पतिः स्त्रीति प्रयोगसाधनार्थं। सपूर्वस्य किमिति। अ ति।२
वयववाचीपूर्वशब्दः किमर्थ इति प्रश्नः। गवांपतिरिति। स्वामिनीत्यर्थः। निपात्यते इति। तेन चोदात्तस्यादेशस्यैव प्रवृत्त्या सपत्नीश
ब्दस्याद्युदात्तत्वमपि सिद्धं। किंच समानस्वामिकस्त्रीविशेषस्यैव रूढ्या बोधनार्थं ङीप्रकारविशिष्टोच्चारणं। अत एव समान
स्वामिकदासीभूम्यादौ सपतिरित्येव। समानत्वं चैकस्यैव तत्तत्पत्नीसंबंधेन भेदमाहेप्यबोध्यं। मुख्य सादृश्यपरत्वपतिकास्तु
न तथा प्रयोग इष्यते। त्रिसूत्रीति। व्याख्यानादिति भावः। संज्ञायोगविशिष्टाद् इति तेन तदभावे ङीबपि नेति भावः। नितांताना
मित्यत्राकारउच्चारणार्थः। नितंतानामिति पाठे तु स्वत्वाभावः। सौत्रः ङी स्येतानीति। अत्रैतच्छब्दस्योपसर्जनत्वेपि त
दंतमनुपसर्जनमेवानुपसर्जनादिति चात्र तदंतविशेषणं। अत एव गृहवृत्तिकृता नारायणेनात्र बहुव्रीहिं कृत्वा
ऽनेन ङीबित्युक्तं तदनुसारेणाचेदं। परे तु उपमानानि इति सूत्रस्थभाष्यस्वरसात् टिड्ढाणञित्यादौ गृह्यमाणविशे
षणत्वस्य कृप्तत्वात्तत्रापि तथैवोचितं। तत्र हि शस्त्रीश्यामेत्यादौ श्यामाशब्दः शस्त्र्यामेव तु उपमेयं तु समासवाच्यमि
ति पक्षे शस्त्रीश्यामो देवदत्त इत्यत्र ह्रस्वत्वं न सिध्यति यद्युपसर्जनस्येति ह्रस्वत्वं। तदा कुंभकपाललोहिनीत्यत्रानुप

ल॰ञा॰प्रो॰

सर्वेण लक्षणाद्दिकारेण प्राप्नोतीत्युक्तं अणोऽपि सत्त्वस्य त्रिषु स्थानेषु एत्वे स्यर्थो बोध्य इत्याहुः आर्त्विमन्त्रणात्वं वर्णोक्तिं त्रकृता ग
तिरश्वं न रद्इत्याघुदात्तः अंतोदात्त इति श्वेतो वाजी जायते इत्यादौ न थापा ग इति भावः कृं इ सिक्रमिति नाद्देशापवादस्ते न तु
त्सर्ग समानदेशा अपवादा इति न्याया न तस्यानिकत्वं ङीप्संनियोगशिष्टत्वं चासवी ध्यं। विशुद्धिवाचीति पाठे तत्र वृत्तिनि
मित्तक इत्यर्थः अन्यत्व संनिधानाद्व्याख्यानाज्ज्ञातोपधस्यैव प्रतियोगित्वेनान्वय इत्याहुतोपधमिन्नादिति वर्णोक्तिं खद्वा
आद्युदात्तः नर्त्तकी तिशिल्पिनि ष्वुन्। गौरशब्दो वर्णवाच्यपं तोदात्त इती हपाठः अनडुही ति आमनडुहः स्त्रियां वे
ति वचनात्पक्षे आम्। सूर्येति। सचेव इति सूर्यादीनामंगानामुपधाया इति व्याख्याने तु सौरी वलाकेति न सिध्येत्।
५५ सूर्ये शौक्र्रदिगि त्रदणातानङीपिन्नरांत मंगान सूर्यशब्द इति तद सिद्धिः वचनं तु सूरी कुंतीत्यत्र चरितार्थं। अणो लोपे
प्याभीयत्वेन सो सिद्धो णातिमित्तकाल्ली वस्तु व्याश्रयत्वान्ना सिद्ध इति पस्यापधात्व मुपधाग्रहणादेव माधिकारमभि
व्याप्याभीयासिद्धत्व मिति वोध्यं। यग्रहणातू तराथ इ याभिति तिर्देशास्तमप्ये कवचनाग्रहणां नक्षत्राणीति नक्षत्रवा
चकाद्योरात्र्तेत्यर्थ स्तेन तिष्यणायुक्तं ते बमहत्सिष्ये मवस्ते व इत्यादि सिद्धं मातुलिपिविद्वेति। पितामही सिध्ययेभि
दं। दंष्ट्रेति। दंशेर्दीम्नी शमेतिकरणे ष्ट्रन्। अयमजादिषु पठ्यते गौरादिषु मातामही शब्द पाठो नावेद्य इत्यन्ये। ज्ञान रामं॰
पदीति। जनपदे भवे त्यर्थः उत्सादित्वाद्णञ्ङी प्याद्युदात्तत्वे प्राप्ते नोदात्तार्थ वचनं। वृत्तिरनुच्छेधातोविका। अव

152
१५२

त्वयदुतितथाचक्रियाशब्दोयमितिभावः अमत्रेति कमंडलुरूपे कुंडी कमंडलोजारात्पतिवत्नीसुतेपुमानिति मेदिनीकोशात्स्वत
त्रनित्यस्त्रीलिंगइतिभावः यद्दृत्तुपिठरेतुननाकुंडमितिविश्वकोशेतस्यनपुंसकत्वमप्युक्तंपिठरमत्रशब्दो चपर्यायोपि दरं
स्थाल्युखाकुंडमित्यमरेनपुंसकत्वमात्रोक्तिस्त्ववयुत्यानुवादइतुच्यतेतदानेकविधसंस्थानेषुअमत्रेषुकुंडव्यवहारेणकुंड
त्वेजातित्वाभावादप्राप्तोङीषितिबोध्यं।स्त्रीविषयत्वादित्युपलक्षणमितिबहवः कमंडलुसंस्थानत्वानुगतत्वात्तद्रूपामत्र
वाचिनोजातित्वमप्यस्तिसूत्रंतुनियमार्थमेवअमत्रेत्तारजायांकुंडेत्येवेत्यपरे आवपनेचनित्यस्त्रीत्वादप्राप्तस्यङीषो
विधिः आवपनमितिसामान्येनपुंसकं।गुणायोगादितिगौणत्वेप्यपदकार्यत्वात्प्रवृत्तिरितिभावः विधित्वानुरोधात्गो
णस्यवास्यप्रवृत्तिः वर्णेश्वेदितितद्विशिष्टश्वेदित्यर्थः अन्यथागुणोशुक्लादयः पुंसीत्युक्त्याऽसंगतंस्यादितिबोध्यं
।सूत्रेवर्णशब्दोशब्दाद्यन्तः कालान्नेतिक्कोर्यगुणायुक्तेत्यर्थः नील्याअनिति।वृत्त्यनुसारेणेदं।प्रतिपदोक्तत्वादन्यत्र
तिङीषंतप्रविष्टनीलशब्दस्येवात्रग्रहणंनत्वस्यलाक्षणिकत्वात् अनाच्छादनेइतिनीलवर्णवतीशाटीत्यर्थेनीलीति
वारणायचरितार्थेनीलस्यारक्तागोरित्यर्थेनीलेत्येवोचितमितिपरे।मैथुनेच्छाशब्दोप्यत्राद्यन्तंतस्तदुतीर्थः अन्येतिमे त्य
युनादन्यपघेच्छतिकमेलेषपतेत्सुकज्ञ।श्रोणाशब्दोवर्णवाचीवर्णानांतरोत्याघुदात्त अन्यतइ जिसिद्धेविकल्पार्थमि
दंवोता।अत्रगुणवचनशब्देनसमस्तकृदंततद्धितांतसर्वनामजातिसंख्यासंज्ञाशब्दातिरिक्तशब्दोग्रह्यते।आकडा

रसूत्रभाष्यपर्यालोचनयाता दृष्टानामेव तत्संज्ञालाभात्। तत्र हि प्रातिपदिकमात्रस्य गुणवचनसंज्ञामुक्त्वाग्रे तद्व्यापकत्वेनैताः क्र
मेणापठिताः। गुणवचनेत्यन्वर्थसंज्ञया गुणोपसर्जनगुणिवाचकानामेव तत्र दृष्टानां सा संज्ञेति तेन रूपादीनां ग्रहणं जाति पदे
नाकृतिग्रहणाद्द्रव्यवृत्तिजातिवाचकानामेव तत्र ग्रहणात् कठादिशाखा तद्धीहृणां च तद्धितान्तत्वादेव व्यावृत्तिः। एतत्सूत्र
४ भाष्योक्तं सत्त्वे निविशतेऽपैति पृथग्जातिषु दृश्यते। आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः इति गुणलक्षणं त्वेकदेशपुर
क्तिर्बहुविशेषणानां वैयर्थ्यात् भाष्यकृताऽव्याख्यानाच्च तस्माट्टीकाकृता रसूत्रोक्तमेव भाष्यसंमतमिति भाष्यप्रदीपोद्यो
ते निरूपितं। शुचिरिति। शुचेर्रोगादिकः। किं दिन्नू। उतइत्यस्याभावेऽपि खरुसंयोगोपधान्नेत्येतन्नाम श्यैनात इत्यस्यात्रासं
बंधः उणादीनामव्युत्पन्नत्वात् क्रादिकाणादित्यस्यात्राप्रवृत्तिरित्यभिमानः। शुक्लेतितु प्रत्युदाहरणमुचितं। तपरः किं। वधूः
कासू। वधूः स्नुषा नवोढा स्त्रीका सू विकलवाचिस्यादिति कोशबलेन नवोढात्वस्य विकलवाकृत्वस्य च प्रवृत्तिनिमित्त
त्वेन खरुशब्दवद्गुणवचनत्वात्। पतिंवरेति। पतिलाभोत्कण्ठावतीत्यर्थः। बह्वादि। बहुशब्दस्योक्तरीत्या गुणवचनत्वा
ए॰२ भावेन ग्रहणं। कृदिकारादिति सर्वत इति च गंसूत्रे। अक्तिनोपीत्यर्थः। व्यवस्थितविभाषाश्रयणात् क्वचिन्न सुगंधि
प्रियकतिर्वैश्यपत्यादीति वृत्तिः। पुराणप्रोक्तेत्र पठ्यते सयद्यपि अयं यथोनुविज्ञः। पुराणाइत्यादावंतोदात्तदर्शने अ॰२ रामं॰
घृतादिपाठादंतोदात्तइत्युदात्त[redacted] निवृत्तिस्वरेणातनोडीपूडीषोः स्वरे विशेषाभावस्तथाप्यत्रपाठसाम

र्थात्यक्षे टाबेवेति बोध्यं। अजननिरितिः आक्रोशे नञ्यनिरिति त्रनेरनिः अहन्त्र प्राप्ते त्र पठ्यते सामर्थ्यादुपसर्ज
नाधिकारबाधः टी घ्रोन्ही प्रावृड्ति ङीष्यंतो टाप् बह्वादिराकृतिगणादिति गणारत्नकृता। पुंयोगादाहेतौ पंचमी। आ
ख्यायामिति पंचम्यर्थे सप्तमी। आख्याशब्दो बोधकपरः आख्या चोपस्थितत्वात्पुंस एव न स्त्रियाः स्त्रियां वर्त्तमान
स्य आख्यत्वाव्यभिचारादाख्यापदवैयर्थ्यापत्तेः पुंस्त्ववयः प्रसिद्धः शब्दवृद्वत्यर्थः पुंयोगाद्धेतोः प्रवृत्तिनिमित्तारोप
णात्स्त्रियां वर्त्तमानात्पुंबोधकाच्छब्दान्ङीषित्यर्थः योगः संबंधः पुंयोगात्किं देवदत्ता आख्यायां किं प्रसूता। तद्भावे हि
स्त्रियां वर्त्तमानेयत्प्रातिपदिकं पुंयोगहेतुकप्रवृत्तिनिमित्तकमित्यर्थोपि संभाव्येत अस्तिहि तत्प्रवृत्तिनिमित्ते प्र
सवे पुंयोगहेतुकत्वं उक्तपुमाख्यातुर्नेष्यतिभावः पुंयोगो त्र दांपत्यरूप एवेति भाष्यस्वरसः यथेयं भर्त्रे पापकृतानुबं
धादीन्लभते एवं तच्छब्दमपीति भाष्योक्ते अदेवकीत्यादितु गोणादिष्वबोध्यमिति केचित्। गोपालिकेति गाः पाल
यतीति गोपालः स एव गोपालकस्तस्य स्त्रीत्यर्थः एवुल् तस्य तु कारकषष्ठ्या समासनिषेधाच्छेषषष्ठ्यासमासे आ
पः सुपः परत्वादित्वं दुर्लभं। वस्तुतः शेषषष्ठ्या अप्यत्र कारकत्वात्सुवुत्पत्तेः पूर्वमेव तत्रापि समासः यथाक
थंचित्कारकग्रहणोपि कथंचित्कारकत्वमादाय गतिकारकोपपदानामित्यस्य प्रवृत्तेरन्यथा भाष्यात् उपपदमति
ङिति सूत्रभाष्याच्च लाभात् यद्वा तल्लिबेध स्यानित्यत्वाद प्रवृत्तेः कारकषष्ठ्याः सुवुत्पत्तेः पूर्वं समासेन न तत्रापीत्वं

सूत्रलभं सूर्येति सन्त्रैः क्यष्ण्याघुदात्तसूर्येषु ब्रुत्वाप्यंतोदात्तमिदं। एतेन ङीब्विधेन टापेव सिद्धिरित्यपास्तं। सूरीति सूर्यस्य स्त्रीया
कुंतीयमानुषीनदेवतेत्यर्थः। महत्त्वेद्दूतिति योगएवेषां स्त्रीत्वमितिभावः। यवनाल्लिप्यामिति। लिप्यर्थे कोत्र ङीषूतस्येद मि
त्यराबाधक इतिबहवः। लिपिरक्षरविन्यासः। मातुलेति मातुलान्यित्यं प्राप्ते उपाध्यायाद्प्राप्ते विभाषेयं। यातुस्त्वयमेवेति त्र्यपा
दाने स्त्रियांग्रहणं उपसंख्यानेन दृतांतात्ववाङीषितितत्तीयेद्दूः श्वेति सूत्रे वार्त्तिकादिति भावः। उपेत्याधीयतेयस्या इति विग्रहः।
अर्येति। हस्वादित्तदाह स्वामिनीति अर्येः स्वामिवैश्ययोरित्युक्तेः। आर्यीति पाठस्तु कैयटाघसंमतः। स्वार्थे इति। अतएव
भाष्ये यांराीअर्येत्येवोक्तं। पुंयोगएव प्रवृत्तेतु उपाध्यायीतिवरयीतिपक्षेङीषमेवोदाहरेत्। कमेरणपणीति सूत्रं त्विंद्री
त्यादिप्याद्वृत्यर्थमितिभावः। करणादितिवक्तव्ये पूर्वग्रहणादनुवृत्तप्रातिपदिकरूपान्यपदार्थेऽवयववाचिपूर्वग्र
हेन बहुव्रीहिः तेन वस्त्रेण क्रीतेतिवाक्ये नअतइति चानुवर्त्तते। करणेकिं सुक्रीता। धनक्रीतेति। कर्त्तृकरणे इत्यत्र
बहुलग्रहणोन गतिकारकोपपदानामित्यस्यानित्यत्वादत्र सुबुत्पत्त्यनंतरमेव समास इति भावः। इदमुपपदमति
ङितिसूत्रे कैयटे स्पष्टं। अयमत्रादिषित्यन्ये। गतीत्यादेरनित्यत्वेन मानमितितदाशयः। अतएवैतत्कर्त्तृकर रामं॰
णे इति सूत्रे बहुलग्रहणफलत्वेन भाष्येनोक्तं मूलत्रं बांबेति सूत्रे गंकादिग्रहणं तुनियमार्थं तेनहृदिस्पृक् इत्या
दौषत्वं नेति दिक्। अल्पाख्यामितीति कङ्ग्रहणोगतिकारकपूर्वस्यापीतिवि[illegible]शिष्टस्यक्तांतत्वं अल्पाख्यायामिति सम .154

= सुबुत्पत्तेः प्रागेव समासे उत्तरपदस्यपदत्वाभावात् आसुदन्योरिसेतदप्रव्रत्यादुरएकोरिसेव सिद्धे इदं नियमार्थमितिभावः

दायोपाधिः अल्पत्वं करणागतं क्रियागतं वा क्तांतांतादित्यर्थः प्रत्ययग्रहणपरिभाषालब्धक्तांतेन जातिपदिकस्यवि
शेषणात्। तुल्यभिन्नीति जातिकालसुखादिभ्यः परा निष्ठेति भिन्नशब्दस्य परनिपातः पाणिगृहीतीति। अग्निसाक्षिक
तया गृहीतपाणिकेत्यर्थः भाष्ये तु पाणिगृहीत्यादीनां विशेषइत्युक्तं। अस्वांगमस्वांगंपूर्वं च तत्तत्पदं पूर्वपदं पुनः कर्म पूर्व। नस्वांग पू
धारयः अस्वांगभूतात्पूर्वपदात्परं यत्क्तांतं तदंतं बहुव्रीहेरित्यर्थः उत्तरसूत्रे भाष्ये कल्याणपाणिपादेत्यादौ तत्प्र
वृत्तिवारणाय तत्रैतदनुवर्त्य कर्मधारयस्याश्रयणेनात्रापि तथैवौचित्यात्। तत्र यदुपसर्जनं पाणिपादमिति समुदायो न
स्वांगं स्वांगसमुदायश्च न स्वांगशब्देन गृह्यते यत्तु स्वांगं पादेति न तत्स्वांगरूपपूर्वपदात्परमित्युक्तं एवं च करमुखीत्या
घसाध्वेव। जातिपूर्वादितीहापि संबध्यतेऽन्यथा बहुनञादीनामस्वांगत्वे न विकल्पः स्यात्तत्पूर्वके दुर्वारत्वात्। तदाह नि
त्यप्राप्ते इति। वस्त्रच्छन्नेति बहुव्रीहित्वात्पूर्वपदप्रकृतिस्वरे शेषनिघाते चानुदात्तान्तोयं। पुत्रादिनीत्यादौ सुप्यजा
तावितिनिर्देशेन नाकृतिग्रहणात्वाद्यभावेन च पुत्रशब्दस्य जातिवचनत्वाभावेपि पुत्रहतीत्यादौ गोणादिङी
षिति बाध्यं अस्वांगादित्येव सिद्धे पूर्वपदग्रहणं स्पष्टार्थं किं च तदभावेऽस्वांगादिति प्राधान्याद्बहुव्रीहिविशेषणं
स्यादिति स्वांगाच्चो। तदंतादित्युपसर्जनग्रहणालब्धं बहुव्रीहेरित्यनुवर्त्तमाने उपसर्जनग्रहणफलमाहातिकेशी
ति। एकविभक्तीति केशानामुपसर्जनत्वमप्रधानत्वं च शिखेति। इदमेव प्रत्युदाहरणं शोभनेत्यादिस्तु शिखा

तंत्रसिद्धत्वविशिष्टेदंतत्वाभावेनाप्राप्तेः यदपि भाष्येऽशिखेति प्रत्युदाहृतं तस्याप्येकदेशएव तात्पर्यं। नञ्पूर्वे सहनञ्वि
ति निषेधेन प्राप्त्यभावात्। एतेन क्रोडादिषु शिखाग्रहणं भाष्यपाठ इत्यपास्तं। ननु स्वमंगं स्वांगं चेत्सुमुखाशालेत्यत्रापि स्वा
न्मुखस्य शालांगत्वात्सुकेशी रथ्येत्यत्र च न स्यात्। केशानां तदंगत्वाभावादत आह। द्रवमिति। स्पर्शवद्द्रव्यपरिमाणं
मूर्तिः। रथ्येति। इदानीं प्राणिस्थत्वाभावात्पूर्वलक्षणेनासिद्धिः। एवं चेदं पूर्वलक्षणे प्राणिस्थत्वमुपलक्षणमित्यत्र
तात्पर्यग्राहकमिति भावः। प्रतिमादिगतस्तनस्य प्राणिनि कदाप्यदृष्टत्वादाह तेन चेदिति। अप्राणिनोपि स्वांगं यदि
तेन तज्जातीयेन वस्तुना प्राणी यथासंबद्धस्तथाऽप्राणी संबद्धश्चेदित्यर्थः। अत एव तस्य चेत्तथायुतमित्यस्याप्राणि
नोपि स्वांगमिति शेषो भाष्ये दर्शितः। पुरस्ता[illegible]दिति। सह्यनंतरस्यैव बाधकः। मध्येइति। सहि पूर्वस्यैव बाधकः। प्रामा
णिकाइति। एवं च सुगात्रीत्यादि प्रयोगाएवेति भावः। नखक्रोडेति टाबंतोयं स्वभावतो विशेषविषयः। शूर्पणखे
ति पूर्वपदात्संज्ञायामिति णत्वं केवलं यौगिकत्वे तु शूर्पनखीत्येव। नडीविति स्वरितत्वादिति भावः। इति शब्द इति।
एवं च भाषायामिति व्यर्थं छंदसीत्यस्य दिक्पूर्वपदादित्यत्रासंबंधेनास्वरितत्वादसंबंधसिद्धेः। परेतु दिगिति सूत्रे
वाह इत्यत्र च छंदसीति वर्त्तते लोके तु वर्त्तनो[illegible]दात्तमेव प्राङ्मुखीति एवं च तन्निवृत्तिबोधनाय भाषाग्रहणं इतिश्चा

राम॰

155

१५५

र्थेति नन्वेवं दृषद्यपि अत एव ङेः रामिति सूत्रे केचित् पठन्ति सख्यशिश्वीच भाषायामिति पाठो दृश्यते इत्याहुः कश्चिदिति सर्वे वि
धीनां कृदिकारादिवैकल्पिकत्वेन सखा सप्रत्ययदीभवेति सिद्धान्तं विघटेत शिशुरस्यादित्य शिश्वी क्वचिदस्याद्युदात्तत्वं तु छांद
सत्वात्। जातिग्रहणेन अर्थैकार्यो संभवान्नदूचकाग्रहणामित्याह जातिवाचीति। अनन्यभावे विषयपशब्द इत्याह नच
स्त्रियामिनि पतिमिति। भिन्नेष्वभिन्नाभिधानप्रत्ययनिमित्तं जातिर्नित्यमेकमनेकानुगतं सामान्यमित्यस्य च प्रयु
क्तादिगुणस्यैकत्वनित्यत्वपक्षे तत्र जातिव्याप्तिर्ज्ञेनेन प्राप्यते सा जातिरिति च युवत्वादावव्याप्तमत आह आकृतीति
ग्रहणामिति करणेल्युट् सामान्ये नपुंसकं आकृतिरवयवसंनिवेशः आकृतिग्रहणं यस्या इति विग्रहः तदाह अनु
गतेति ईदृश्याकासेगोरित्याकृत्युपदेशादिव्यंग्यत्वार्थः न च बालाद्यवस्थाभेदभिन्नानेकदेहवृत्तिदेवदत्तत्वा
देराकृतिव्यंग्यत्वेन तत्र जातिव्याप्तिरिति वाच्यं। समानकालिकानेकव्यक्तिवृत्त्यनुगतसंस्थानव्यंग्यत्वार्थात्।
अवस्थाभेदेपि तदेवेदमिति प्रतीतेः स एवायमिति प्रतीतेश्च तज्जातीयोयमित्यप्रतीतेश्च अत एवं द्वित्वादिकं न जातिः
पंचैवं द्रोपाख्यानादिभिरनेकेषां समकालिकत्वेपि सर्वेषां संस्थानस्यैकत्वेमानाभावात्। दुर्गोऽपरोत्याद्यौ स्त्रीविष
यत्वादपि न ङीष्। तटीति अनुगतसंस्थानव्यंग्यमेतत् जलसमीपदेशविशेषो हि तटं। नन्वेवं वृषलत्वादीनां जा
तित्वं न स्यात् अवयवसंस्थानस्य ब्राह्मणादिसाधारण्येन तस्या आकृतिग्रहणत्वाभावात् किंतु साक्षादुपदेशगम्या

सेत्यत आह लिंगानामिति। द्व्यमपि जातिरित्यर्थः। लिंगानामिति कर्मणि षष्ठी सर्वाणि लिंगानि न भजंतीति सर्वे प्राद्युस्य लिं-
गापेक्षत्वे विभाष्य प्राप्ताण्यादृष्टजोऽपिः समासश्च। आख्यातमाख्यानमुपदेशः कथनात् उपदेशान्। एकत्रै दृष्ट इत्युपदि-
ष्टे अन्यत्र तद्गृहे माना भावान्नेन्द्रत्वादित्यथा। ब्राह्मणत्वं तु एकत्रोपदिष्टेन तत्पित्रादिषु सुग्रहं वृषलत्वं तदपत्यतत्सहोदरा-
दौ सुग्रहं। अत्राकृतिग्रहणेति निःत्यानित्यसाधारणमिति युवत्वादिकमपि जातिरेतन्मते। अपर आह इत्यादिना यावद्द्रव्यभा-
वि [redacted] त्वमित्यनित्यव्यावृत्तं लक्षणांतरं भाष्ये दर्शितं एवं च भिन्नऋषिकत्वैकलक्षणाद्रूपत्रामा-
एपेन कुमारादिष्वाप्नुहैं जातिकार्यविकल्पः अत एव युवजातिरित्यत्र पुंवत्वं युवतितरेत्यत्र तरभावश्च भाष्ये उदाहृतः
नन्वेताभ्यामप्यौपगवी कठीत्यादेरसंग्रहो नुगतसंस्थानव्यंग्यत्वाभावात्स्त्वं लिंगत्वाच्चेत्यत आह। गोत्रं चेति। प्राप्त्वी-
यमत्र गोत्रमत एव गोत्राद्यूनि प्रत्ययो भवति स्त्रियां लुगिति न्यासे औपगवी माणविकेत्यत्रापि अनुपसर्जनमित्य-
नुपसर्जनलक्षण ईकारो न प्राप्नोति माभूदेवमणंतादनुपसर्जनादित्येवं भविष्यतिइति प्रौढ्या पूर्वपक्षिणोक्तेन त-
दंगीकृत्य वइहतर्ह्यौपगवी भार्यः जातिलक्षणाः पुंवत्त्वप्रतिषेधो न प्राप्नोति माभूदेवं वृद्धिनिमित्तस्येत्येवं भविष्यति
एवं तर्हि स्नुचुकायनीभार्ये दोष इत्येको गोत्र इति सूत्रस्थ भाष्ये युवापत्यस्य जातित्वाभावकथनं संगच्छते अन्यथा
जातिलक्षणाङ्गीषएवपरत्वाद्युक्तं युक्तत्वं पुंवत्त्वप्रतिषेधो न प्राप्नोतीत्यसंगतिः स्व स्नुचुकायनीभार्ये दोषस्तुङीषू पुं

वत्त्वप्रतिषेधप्रयोरसिद्धिरूपो बोध्यः । सर्वे तोक्ति नृत्यादि ति ङीषि तु पुंवत्त्वप्रतिषेधासिद्धिरेव दोषः । अत एव ब्राह्मो जाताविति सू
त्रेऽपत्ये जातौ नेत्यर्थः संगच्छते तत्र वत्त्वपत्यस्य जातित्वाव्यभिचारात्तत्र संगतिर्ब्राह्मो नारद इत्यसिद्धिरतः सामर्थ्येनात्र शा
स्त्रीयगोत्रस्यैव ग्रहीतुमौचित्यं । अनन्तरापत्यप्रत्ययान्तेऽवन्तीत्यत्र जातिप्रयुक्तो ङीषित्यनुपसर्जनादिति सूत्रभाष्ये त्व
नन्तरे श्वदस्यास्मिन्द्रोणायनिवद्गो चत्वारोपदृत्यभिप्रायेण । पूर्नितु न शास्त्रीयगोत्रत्वारोपस्तत्र युवेव न गोत्रमितिनियमे
न संज्ञानिषेधात्तदाहापत्यप्रत्ययान्त इति अपत्यं पौत्रप्रभृतीति परिभाषित इति शेषः । शाखाध्येत्रिति षष्ठीतत्पुरुषः शाखा
यामस्त्रीविषयत्वात् जातिकार्यं लभत इति अनेनासातिदेशत्वं बोधयति कठेन प्रोक्तमधीत इति वैशंपायनान्तेवासित्वात्प्रो
क्तार्थे णिनेः कठचरकादि ति लुक् । अध्येत्रणः प्रोक्ताल्लुक् वह्वृक्चोध्येतव्यांपस्पा इति विग्रहे ऋक्पूरित्यप्समा
सांतः स्त्रिया अध्ययनाभावे विपितृ ह्वृच्यत्वमक्षाल्बह्वृचयथानधीयाने माणवके । ब्राह्मणीत्यत्रापत्ये णि ब्राह्मो जाताविति तु
क्ते स्त्रि लोपाभावः परेतु आकृतिग्रहणेत्येवलक्षणमाकृतिपदमुपदेशोपलक्षणमाकृतिद्वारा साक्षाद्वोपदेशेन ग्राह्या
जातिरित्यर्थः तत्रेह शाकारो गोरित्याकृत्युपदेशग्राह्या गोत्वादिर्जातिः । अयं ब्राह्मण इति साक्षादुपदेशग्राह्या ब्राह्मण
त्वादिर्जातिः यद्वाकृतिग्रहणा जातिग्राहकोपदेशस्याप्युपलक्षणं लिंगानां च न सर्वभागितित्स्वरूपानुवादस्तेन शुक्ला
दि गुणानामेकत्वेपि जातित्वाभावो बोधितः । अत एव विशेषणानां चेति सूत्रे जाते राविष्टलिंगत्वं भाष्ये उक्तमाविष्टर

लिंगत्वं नियतलिंगत्वमिति केपरः तच्च प्रायिकमिति केचित् भाष्यप्रामाण्यात् ज्ञातेरेकशक्त्या वाच्यापान्न त्रिलिंगता तट त्रिष्वित्यादिको
शक्ततां प्रमाद इत्यन्ये। सकृदाख्यातनिर्ग्राह्येत्यनेनैकत्वमनेकानुगतत्वं च बोधितं। सकृदेकवारं कचिद्व्यक्तौ साक्षात्कृतिद्वा
रा वा यदि शाच्यत्वं तदैव गृहीतुं शक्येति तदर्थः गोत्रं चेत्यादि प्राग्वदेव। अत एव प्रादुर्भावविनाशाभ्यां सत्त्वस्य युगपद्गुणैः
असर्वलिंगां बह्वर्थीं तां जातिं कवयो विदुरिति लक्षणांतरं भाष्ये उक्तं। सत्त्वस्य द्रव्यस्य प्रादुर्भावविनाशाभ्यां यानोत्पन्ना
त्रिसा जातिरिति लक्षणं यावद्द्रव्यभाविनी तितदर्थः अनेन गोत्वब्राह्मणत्वाद्योरुभयोरपि संग्रहः गुणैर्युगपत्
द्रव्येण संबध्यते यथा निर्गुणस्य द्रव्यस्य नोपलंभस्तथा जातिरहितस्यापीत्यर्थ इति केपरः इदं स्वरूपकथनमेव।
अत्र लक्षणेऽसर्वलिंगामित्येतन्मदुक्तार्थकमेव न तु लक्षणांतरमनुपयोगात् बह्वर्थीं सर्वव्यक्तिव्यापिनीमित्यर्थः
एतदेकवाक्यतया पूर्वलक्षणेपि मदुक्तव्याख्यैवोचिता। अत एव कः पुनरनयोर्जा तिलक्षणयोर्विशेषः यथा
पूर्वलक्षणं तथा कुमारीभार्येति भवितव्यं यथोत्तरं तथा कुमारभार्येति भाष्ये लक्षणमित्येकवचनमेव प्रयुक्तं
अत एवाकडारसूत्रशेषे आकृतिग्रहणा जातिरित्येवोक्तं भाष्ये इत्याहुः बलाकेति अयं च विसकंठिकापर्यायवा
च्यजातिविशेषवाची। स च बकत्वव्याप्यान्यो वेत्यन्यत्। अस्त्रीविषयादित्यस्य प्रवृत्तिनिमित्तैक्ये लिंगांतररहित
मित्यादित्यर्थः एतेन बलाकायतीति योगिकस्य सर्वलिंगत्वात् बलाका बकपंक्तिः स्याद्बलाका विसकंठिका